# अध्याय – ३

# नगरनिर्माणार्थं भूपरिग्रहः एवं भूपरीक्षा

# नगरनिर्माणार्थं भूपरिग्रहः एवं भूपरीक्षा

प्राचीन भारते यदा कस्यापि नगरनिवेशने उत्तमाभूमिः जलम्, वायुः, सामाजिकमेवं राजनैतिकादिसर्वप्रकारस्य वैशिष्ट्यमेवं दृष्टिगत स्थान-विशेषस्य परिग्रहण परम्परा अस्ति। एतत्परम्परायाः पुष्टिः भारतीयस्थापत्य-ग्रन्थेषु दृश्यते। तत्र जनपद- खेट- ग्राम-पुरादि निवेशनार्थं भूमि-संग्रहः, भूमि-परीक्षा, अथवा भू-परीक्षा शीर्षकान्तर्गतं प्रशस्तायाः-अप्रशस्तायाः भूम्याः विस्तारपूर्वकं विवेचनं वर्तते।

## १.नगरनिर्माणार्थं भूपरिग्रहणम्-

इदं वास्तुशास्त्रमेकं सर्वोत्तमं समन्वितं सर्वव्यापकञ्च विज्ञानं वर्तते। अतः एव ज्यौतिषशास्त्रस्य, भूगर्भ-विद्यायाः, भूगोलस्य एवं एतादृशानामन्य- शास्त्राणां समावेशः अस्मिन् वास्तुशास्त्रे कृतः वर्तते। वस्तुतस्तु अस्य वास्तुसास्त्रस्य सर्वतो व्यापी दृष्टिकोणः वर्तते। यथा अस्य शास्त्रस्य सामाजिकरीत्या एवं सर्वजनहिताय, सर्वजनसुखाय अपि उपयोगः मन्यते। मनुष्याणां सहचराः पशवः वनस्पतयश्च सदैव गण्यन्ते। तैः विना पशवः, मनुष्याणां कृते उपयोगिनः सन्ति। अनेन प्रकारेण यस्मिन् भूप्रदेशे वनस्पतीनां विकासः भवेत्, घनाः वृक्षाः क्षुपाः इत्यादय; स्युः, प्राकृतिकं वातावरणं स्यात्, तडागादिजलाशयाः स्युः, जलप्रपातः स्यात्, वनोपवनानि स्युः, यस्य स्थानस्य धार्मिकं महत्त्वं स्यात्, लतापत्रादितृणादयः यत्र स्युः, एतादृशे भूप्रदेशे यदि नगरनिर्माणं कृत्वा मनुष्यः यत्र वसेत् तदा तत्र मानवजीवनस्य सम्पूर्णः विकासः भवितुमर्हति।[१] अत एव एतादृशं प्रदेशं नगरनिर्माणाय श्रेष्ठं मत्वा तत्र नगररचनां कुर्यात्।

---

[1] समराङ्गणसूत्रधारः,भवन-निवेश, पृ- १२

अस्मिन् समराङ्गणसूत्रधारग्रन्थे भूमिपरिग्रहः, भूसंग्रहः, भूपरीक्षणम् इत्यादिविषयाणां सुष्टुप्रकारेण विस्तृतं वर्णनं कृतं वर्तते। अनेनैव प्रकारेण नगरोचितानां पूरोचितानां ग्रामिचितानां प्रदेशानां नगरनिर्माणाय भूपरिग्रहः कर्तव्यः। यत्र जलसंग्रहः (तडागादि) अधिकः स्यात् अथवा नदीतटं स्यात् कृषिकार्यं, पुष्पफलादिनामत्यधिक मात्रायामुत्पादनं कर्तुं शक्यं स्यात् एतावत् अवनी नगरनिर्माणार्थं उत्तमा भवति।[२]

नगरनिर्माणविषये भवनगृहादि- निर्माणार्थं काष्ठं, मृत्तिका, जलमित्यादीनामनिवार्य पदार्थानां पूर्त्यर्थं यत्र नैकवृक्षाः यथा साकं, शालः, सीसमः, अर्जुनः इत्यादिभिः वृक्षैः युक्तं घनं वनं स्यात् तस्मात् वनात् गृह-भवन-निर्माणार्थं काष्ठं सरलतया प्राप्यते। अस्माकं जीवने जलस्य, भवनस्य, वनस्य च एकः पर्यायः एव। अतः यस्मिन् प्रदेशे वने च सरलतया सुलभतया जलं काष्ठं च प्राप्येत तस्मिन्नेव प्रदेशे नगरनिर्माणादि कार्यं कुर्यात्।

एतेनेदं स्पष्टं भवति यत् वास्तुयोजनायां जलस्य, काष्ठस्य च विचारः प्राथमिकः। अस्माकं भारतदेशे प्रायः प्राचीनानि नगराणि नदीनां तटेषु एव सन्ति। भारतीय परम्परायां धार्मिक दृष्ट्या च वयं नदीं मातृरूपेण पूजयामः। नद्यः लोकमातरः सन्ति। नद्याः तटे यत् नगरमस्ति तस्य सम्पूर्णः विकासः अतित्वरया अधिकरूपेण भवति। तात्पर्यं नद्याः मनुष्यजीवनेन सह अतीव घनिष्ठो सम्बन्धो वर्तते।[३]

विश्वकर्मवास्तुशास्त्रम् इति ग्रन्थेऽपि भूपरिग्रह विषये भूमयः शुभाशुभ लक्षणं वर्णितं वर्तते। यथा-

**पुरा भूमिरियं धात्रा विशाला च वसुन्धरा।**

**जलाधारान्विता सृष्टा सशैलवनकानना।।**

---

[२] समराङ्गणसूत्रधारः, भवन-निवेश, पृ-१२

[३] समराङ्गणसूत्रधारः, भवन-निवेश, पृ-१२

**हिमवद्विन्ध्यमलयैरन्यैः कुलमहीधरैः।**

**कनकाद्यैर्दिव्यलोहैर्गर्भिता च समन्ततः।।**

**तथापि भूगर्भसारात् क्वचित्खादुरसान्विता।**

**क्वचिद्रसेन हीन क्वचिदुष्णा च शीतला।।**

**क्वचिद्धीकरसत्वाढ्या क्वचित्सत्वखगावृता।**

**क्वचिदत्यन्तसुखदा क्वचिदुद्वेगकारिणी।।**

**इत्येवं बहुधा जाता कालभेदेन भूरियम्।**

**परीक्षयेद्वास्तुभूमिमतस्सल्लक्षणान्विताम्।।** [४]

जगत्सृष्टिकाले विश्वकर्मा ब्रह्मणा इयं भूमिर्विशाला वसुधारिणी च स्वादुजलान्विता शैलोद्यानलोहादिसद्वस्तुभरिता च भूमयः गर्भवेगवशात् क्वचित्प्रदेशे स्वादुजलान्विता, क्वचित् कटुजलान्विता, क्वचिज्जलहीना च भूरियं सञ्जातेत्यादिस्सुगमार्थः। अतः पूर्वपादितक्रमेण कालभेदेन गर्भवेगवशेन च भूम्याः क्वचित्सुखप्रदत्वं, क्वचिदसौख्यप्रदत्वमपि सञ्जातम्। तस्माद् बुधोत्तमः सुखादिमङ्गलाशंसी पुमान् देवालयनगरपुरग्रामभवनादि निर्माणसमये निर्माणात्पूर्वमेव तादृशभूम्यस्सदसल्लक्षणं परीक्ष्योत्तमां भूपरिग्रहणीया।

## १.त्रिविधदेशः -

समराङ्गणसूत्रधारग्रन्थे नगरनिर्माणार्थे भूचयन हेतु भूमिपरीक्षा इति नाम्ना अष्टमोऽध्यायः वर्तते।[५] विश्वकर्मवास्तुशास्त्रम्, मयमतम्, अपराजितपृच्छा, मानसार आदि प्रायः वास्तुशास्त्रीयग्रन्थेषु भूमिचयनास्यार्थे भूमिसंग्रह, भूपरीक्षा, भूपरिग्रह आदि शब्दार्थानां प्रयोगः

[4] विश्वकर्मवास्तुशास्त्रम्, अ.५.१-५

[5] समराङ्गणसूत्रधारः (पूष्पेन्द्र), अ.८

वर्तते। इति भूमि-चयनम् आधुनिककाले **सर्वेयींग** इति कथ्यते। साम्प्रतिकाले विविधप्रकल्पनमेवं विशालानि एवमुत्तुङ्गानि उद्योगभवनानि तथा आवासीय भवनानि अधिकसंख्यायां समीप-समीपे गृहनिर्माणं करणीयमस्ति। तदा उपग्रहः (सेटेलाईट) द्वारा वायु-सर्वेक्षणं क्रियते। अपराजितपृच्छा ग्रन्थे विश्वकर्मा: पुष्पकविमानद्वारा पृथ्व्यायाः वायु सर्वेक्षणं कृतमिति उल्लेखोऽस्ति। नगरादिनिवेशनहेतुः उपयुक्तभूमिचयनस्य अनिवार्यता सूचिता अस्ति। यथा साम्प्रतियुगे कस्यापि निवेशनार्थं प्राक् सर्वेक्षण द्वारा भूमिः एवं तत्स्थलस्य वातावरणादि परिवर्तित घटकानां ज्ञानं प्राप्तं क्रियते, एतत् प्रकारेण सम्भवतः अस्माकं पूर्वजा अपि उपयुक्तविशिष्टं यन्त्राणां सहयोगं स्वीकृत्वा भूमयः सर्वेक्षणं कृतवन्तः। एतेन निम्नदर्शितः श्लोकेन स्पष्ट भवति-

**पुष्पकं तु समारुह्य मेरुमाश्रित्य दक्षिणम्।**

**विलोकिता भूतधात्री समुद्रान्ता च मेदिनी।।**[६]

समराङ्गणसूत्रधार ग्रन्थानुसारेण भूम्याः(देशस्य) त्रिधा प्रकाराः सन्ति। देशः स्याज्जाङ्गलानूपसाधारणतया त्रिधा।[७] भूम्याः विभिन्नता एवं स्थानीय लक्षणानुसारं जाङ्गलः, अनुपः तथा साधारणः इति त्रिविधात्मकः देशभेदाः वर्णिताः वर्तन्ते।

**(अ) जाङ्गलदेशः (जाङ्गलभूमि)**-

**दूराम्बुरिरिणप्रायो ह्रस्वकण्टकिपादपः।**

**रूक्षोष्णचण्डपवनः कृष्णमृत् तेषु जाङ्गलः।।**[८]

---

6 अपराजितपृच्छा, सूत्र-३५.१

7 समराङ्गणसूत्रधारः(पुष्पेन्द्र), अ.८.२

8 समराङ्गणसूत्रधारः (पुष्पेन्द्र), अ.८.३

अस्य देशे जलं दुरं स्यात्, इरिणप्रायः अर्थात् वालुका अधीकं वर्तते, ह्रस्व–लघु–लघु कण्टकयुक्तानि वृक्षाणि सन्ति, वायुः रुक्षःउष्णःअतिवेगयुक्तः, मृत्तिका कृष्णवर्णा अस्ति सः देशः जाङ्गलदेशः इति कथ्यते।

**(ब) अनूपदेशः–**

**निम्नो भूरिजलः स्निग्धो बहुमस्त्यामिषो हिमः।**

**स्यादनूपः सरित्प्रायः स्निग्धोच्छ्रितबहुद्रुमः।**

यत्र स्वादुजलं किञ्चित् न्यूनमेव प्राप्यते, यः देशः स्निग्धः, शीतलः तथा बहुमस्त्यमिषो युक्तः, सुन्दरसरिताः, स्निग्धः एवं उच्छ्रिताः बहवः वृक्षाः वर्तन्ते सः देशः अनूपदेशः इति नाम्ना प्रख्यातः।

**(क) साधारणदेशः–**

**यः पुनर्नातिशीतोष्णः स्याद् देशद्वयलक्षणः।**

**स साधारण इत्युक्तो देशो देशविशारदैः।।**[९]

यत्र पूर्वोक्तजाङ्गलदेशः एवम् अनूपदेशः, देश द्वयस्य सम्मिश्रितं लक्षणयुक्तम् अर्थात् न अधिकोष्णः नाधिकशीतलः, सः देशः देश विशारदैः साधारणदेशः इति मन्यते।

## ३.षोड्शभूमिः –

एतेषु त्रिषु देशेषु भिन्नभिन्न लक्षण–युक्त स्वस्यवैशिष्टययुक्त षोड्श प्रकारस्य भुमीनां वर्णनं समराङ्गणसूत्रधारग्रन्थे राजाभोजः कृतवान्।

यथा–

**जाङ्गलादिषु देशेषु त्रि(पुष्णे ?ष्वप्ये)षु स्वलक्षणैः।**

---

[9] समराङ्गणसूत्रधारः,(पुष्पेन्द्र), अ.८.५

**युक्ता षोडश विज्ञेया भूमयः प्रविभागतः।।**

**बालिशस्वामिनी भोग्या सीता गोचररक्षिणी।**

**अपाश्रयवती कान्ता खनिमत्यात्मधारणी।।**

**वणिक्प्रसाधिता द्रव्यसम्पन्नामित्रघातिनी।**

**आश्रेणीपुरुषा शक्यसामन्ता देवमातृका।।**

**धान्या हस्तिवनोपेता सुरक्षा चेति षोडश।**[१०]

अधुना षोडश प्रकारान् भूम्याः पृथक्-पृथक् लक्षणं दर्शयते। यथा -

**(१) बालिशस्वामिनी –**

या भूमिः सुन्दरा, समृद्धा, बालिशराजा द्वारा शश्या, भद्रजना भूमिः बालिशस्वामिना कीर्तिता।

**(२) भोग्याभूमि-**

सर्वप्रकारेण अधिकतया भोग्या, साधनसंयुक्ता क्षितिः भोग्येति उच्यते।

**(३) सीतागोचररक्षिणी भूमिः -**

यत्र नद्यः,नद्यश्च गिरिर्मध्येऽथवा बहिः सीमाक्षेत्रं विभक्तमस्ति सा भूमिः सीतागोचररक्षिणीभूमिः इति नाम्ना प्रख्याता।

**(४) अपाश्रयवतीभूमिः-**

या भूमिः भयकारिणी, जनावासायोग्या, नदी, गिरिः एवं वनं भयानकं त्रासदायकं वर्तते, सा भूमिः अपाश्रयवतीभूमिः कथ्यते।

---

[10] समराङ्गणसूत्रधारः(पुष्पेन्द्र), अ.८.६-९

**(५) कान्ताभूमिः-**

या भूमिः वनोपवनैः सरिद्भिः, कुञ्जैः युक्ता मनोहरा दृश्यते सा भूमिः कान्ताभूमिः प्रकीर्तिता।

**(६) खनिमतीभूमिः-**

यत्र सुवर्ण-रौप्यादि धातवः, लवणादीनि च भूयांसि प्राप्यन्ते सा भूः खनिमतीभूः विख्याता।

**(७) आत्मधारिणीभूमिः-**

यत्र अतिस्वतन्त्रः एवं दण्डकोशासनादिभिः स्फितलोकाश्रया अर्थात् अधिक जनसंख्या अस्ति सा भूमिः आत्मधारिणीभूमिर्ज्ञायते।

**(८) वणिकप्रसाधिताभूमिः-**

यत्र क्रयविक्रयहेतुः अत्यन्धिकसौलभस्य एवं वैश्यजनानां कृते विशेष निवासस्थानानि भवन्ति, सा भूमिः वणिकप्रसाधिताभूमिः ख्याता।

**(९) द्रव्यवतीभूमिः-**

शाकः, अश्वकर्णः,खदिरः,श्रीपर्णी, स्यन्दनः, आसनः, वेणुः, वेत्रः, एवं शरः आदयः वृक्षाः अधिकमात्रायां भवन्ति, सा भूः द्रव्यवतीभूमिः विख्याता।

**(१०) अमित्रघातिनीभूमिः-**

यत्र जनपदः सुविभक्तः अस्ति यत्र शान्तिपूर्णं च मैत्रीपूर्णं वातावरणमस्ति सा भूमिः अमित्रघातिनीभूमिः प्रकीर्तिता।

**(११) आश्रेणीपुरुषाभूमिः-**

सा भूमिः दुर्गाश्रिता एवं विनीतजनयुक्ता धरा आश्रेणीपुरुषाभूमिः इति नाम्ना विख्याता।

**(१२) शक्यसामन्ताभूमिः-**

यत्र सामन्त राजानाः परस्परम् उदासीनाः एवं मन्त्रोत्साहादिपरामुखाः सन्ति, सा भूमिः शक्यसामन्ताभूमिर्ज्ञायते।

**(१३) देवमातृकाभूः-**

यत्र अनपेक्षिता वर्षाजलसरयुलः प्रदेशः अस्ति सा भूमिः देवमातृकाभूमिः प्रख्याता।

**(१४) धान्यशालिनाभूमिः-**

विना कर्षणेन एवं विना प्रयासेण धान्योद्गमसाः धराः धान्यशालिनी धराः इति नाम्ना विख्याता।

**(१५) हस्तिवनोपेताभूमिः-**

यत्र गजप्रधानवनं (गज संख्या अधिक मात्रा युक्त वनं) एवं गिरियुक्ता तथा सैन्य-वर्धिनी भूमिः हस्ति-वनोपेता-भूमिः ज्ञायते।

**(१६) सुरक्षाभूः-**

यत्र भूमिः चतुर्दिक् विषमपर्वताः एवं नद्यश्च एताभिः परिविष्टितमस्ति, अर्थात् सा भूमिः गिरिदुर्गमेवं जलदुर्गद्वारा सुरक्षितमस्ति सा भूमि; सुरक्षाभूमिः कीर्तिता।[११]

## ४. नगरनिवेशनार्थं प्रशस्ताप्रशस्तभूमयः-

[11] समराङ्गणसूत्रधारः (पुष्पेन्द्र), अ.८.१०-२५

समराङ्गणसूत्रधारग्रन्थे जनपदं, खेटकः, ग्रामः तथा नगरं सन्निवेशनार्थं प्रमुखतया प्रशस्तभूमयः निम्नलिखितानि दृश्यन्ते–

**यस्यां सदैव जायन्ते कलधौतादि धातवः।**[१२]

अर्थात् यत्र सुवर्णरजतादि खनिज द्रव्याणि सदैव प्रचूरमात्रायां प्राप्यते।

तथा – **धातुस्यन्दोल्लसत्.........।**[१३]

**.............कुञ्जगुल्मलतावृतैः।**[१४]

**तरुच्छन्ना........................।**[१५]

अर्थात् यत्र भूमिः नाना प्रकारेण सुन्दरा, सुरम्या, कुञ्ज–गुल्म–लता–वृक्षादीनां युक्ता शोभनीया अस्ति।

**उत्सङ्गिताः पृथुशिलैः समन्तादवनीधरैः।**[१६]

यः भूप्रदेशः बृहद् शिलायुक्त– पर्वतश्रेणी द्वारा चतुर्दिक् परिवेष्टितः भवति।

**तीर्थावतारकान्ताभिः स्वादुतोयाभिरावृताः।**[१७]

**...................स्वादुस्वच्छस्थिरोदकाः।**[१८]

---

[12] समराङ्गणसूत्रधारः (पुष्पेन्द्र), अ.८.१५

[13] समराङ्गणसूत्रधारः (पुष्पेन्द्र),अ.८.२७

[14] समराङ्गणसूत्रधारः (पुष्पेन्द्र),अ.८.२७

[15] समराङ्गणसूत्रधारः (पुष्पेन्द्र),अ.८.४०

[16] समराङ्गणसूत्रधारः (पुष्पेन्द्र),८.२७

[17] समराङ्गणसूत्रधारः (पुष्पेन्द्र), अ. ८.२८

[18] समराङ्गणसूत्रधारः (पुष्पेन्द्र), अ.८.४१

**स्निगधाः सारभृतः शुद्धाः प्रदक्षिणजलाशयाः।**[१९]

यत्र तीर्थावताराः, स्नानमुपयोग्याः तथा मधुरजलयुक्ताः निर्मलाः नद्यः वर्तन्ते तथा दक्षिण–दिशायां स्निग्धाः सारयुक्ताः एवं तस्य प्रदक्षिणे शुद्धजलयुक्ताः जलाशयाः भवन्ति।

**कोकिलालापसुभगैर्मधुमत्तालिशालिभिः।**

**विचित्रफलपुष्पाढ्यैः काननैरुपशोभिताः।।**[२०]

यत्र भूमौ वनेषु कोकिलाः मधुरकुजनं कुर्वन्ति एवं मधुमत्ताः भ्रमराः गुञ्जनं कुर्वन्ति तथा तत्र विविधानि फलानि– पुष्पाणि वर्तन्ते।

**निष्कंटकाश्मवल्मीकैः प्रभूतयवसेन्धनैः।**[२१]

यत्र निष्कण्टकवृक्षाणि, सुन्दरंपाषाणमेवं वाल्मिकयुक्ता भूमिः प्रशस्तभूमिः नगरनिर्माणार्थं भवति।

यत्र भूमिः **विभक्तक्षेत्रसीमान्तैगोचरैरुपशोभिताः।**[२२]

सा भूमिः **दुरात्मनाधृष्या यास्तथानेकाश्रयान्विताः।**[२३]

**प्रागुदक्प्लवाः**[२४] भूमिः नगर निर्माणे प्रशस्ता अस्ति।

यत्र भूमौ **दूर्वासस्यौषधीमुञ्जकुरुन्दकुशकवल्कलैः।**[२५]

---

19 समराङ्गणसूत्रधारः (पुष्पेन्द्र), अ.८.४०

20 समराङ्गणसूत्रधारः (पुष्पेन्द्र), अ.८.२९

21 समराङ्गणसूत्रधारः (पुष्पेन्द्र), अ.८.३२

22 समराङ्गणसूत्रधारः (पुष्पेन्द्र), अ.८.३२

23 समराङ्गणसूत्रधारः (पुष्पेन्द्र), अ.८.३४

24 समराङ्गणसूत्रधारः (पुष्पेन्द्र), अ.८.४०

25 समराङ्गणसूत्रधारः (पुष्पेन्द्र), अ.८.४१

**संरम्भत्रासनिर्मुक्तं मनश्च रमयन्ति याः।**

यत्र भयं तथा व्याकुलता न भवति तथा मनः रमयति सा भूः अपि नगरनिर्माणे उत्तमा भवति।

**वास्तुयज्ञामरस्थानाद्यारामोद्यानसंभृताः।**[२६]

यत्र शिल्पशाला, यज्ञशाला,देवप्रासादाः, आरामोद्यानादिनि स्थानानि भवन्ति।

**तटाकवापीस्थानैश्च या समन्तादलङ्कृताः।।**

**या वाहनानां सुखदां मिथुनानां रतिप्रदाः।**

यत्र वापी–तडागादिस्थानानि भवन्ति, यानानि सुखपूर्वकं सञ्चारयन्ति तथा मैथुनादीनां कृते रतिप्रदस्थानानि उपलब्धानि भवन्ति सा भूमिः नगरनिर्माणार्थमुत्तमा भूमिः प्रख्याता।

अनेन प्रकारेण समराङ्गणसूत्रधारग्रन्थे वर्णितं जनप्रदं तथा नगरादिसन्निवेश हेतुः प्रशस्तभूमिः परिग्रहणार्थं प्रदेशः परिगृहीतः। यत्र जलाधिक्यं प्रवर्तते, कृषिकार्यं सरलतया सुलभतया कर्तुं शक्यते अर्थात् अधिकमात्रायां सरलतया प्राप्यते। भवननिर्माणद्रव्याणि काष्ठस्यावश्यकता पूर्त्यार्थं घनानि वृक्षयुक्तानि वनानि भवन्ति। यत्र बृहद् गृहोपयोगी वृक्षाणि शोभन्ते। यत्र जीवनावश्यकसर्ववस्तूनि सरलतया उपलब्धानि भवन्ति तत्र नगरादिनिर्माणं करणीयम्।

विश्वकर्मवास्तुशास्त्रग्रन्थे आचार्यविश्वकर्माः खेटः, खर्वटः, ग्रामः इत्यादि नगर–सन्निवेशनार्थं प्रशस्तभूमीनां लक्षणस्य उल्लेखं करोति। यथा हि –

**खेटस्य वास्तुभूमिस्तु प्रायः काननमध्यगा।**

**शबरैश्च पुलिन्दैश्च संयुता मांसजीविभिः।।**

**पर्णगेहान्विता विष्वगथ वेष्टिलगेहभाक्।**

---

[26] समराङ्गणसूत्रधारः (पुष्पेन्द्र), अ.८.४२

**एकादिदशवीथ्यन्ताः क्षुद्रवीथ्यस्समन्ततः।।**[२७]

वास्तुभूमिस्तावत् खेटनार्थं प्रायशोऽरण्यमध्यभाक्कथिता। एकवीथीप्रभृति दशवीथ्यन्तास्त्रस्थाप्याः। क्षुद्रवीथ्यादयस्तु तत्र तत्र स्थलानुकूल्येन वीथी अपि स्थापयितुं शक्यते। तथा–

**वास्तुभूमिः खर्वटस्य नदीतीरगता मता।**

**रसालसालबकुलैस्तिन्त्रिणीवेणुपाटलैः।।** [२८]

एवमेव खर्वटस्य वास्तुभूमिः प्रायशः नदीतीरगतैव स्यात्। छायावृक्षसमूहभरिता आरामावृता (क्रीडोद्यानयुक्ता) प्रदेशः प्रशस्तः मन्यन्ते।

अपराजितपृच्छानुसारं नगरनिवेशः 'नदीनां सङ्गमेषु '[29] वा ' गिरिमाश्रिते'[३०] कर्तव्यः। वास्तुशास्त्रीय दृष्ट्या नदीतटे वा पर्वतस्योपरि स्थित नगरं नगरजनानां कृते स्वास्थकारकमेवं मङ्गलदायकं मन्यते। अतः आचार्यकौटिल्यमतानुसारम्–

**वास्तुप्रशस्त देशे नदीसङ्गमे ह्यदस्य वा विशोषस्याङ्के सरसतटाकस्य वा।**[३१]

वास्तुविद्वजनाः यत्र श्रेष्ठस्थानं मन्यन्ते तत्र वा नदीनां सङ्गमे वा सरसस्तटाकस्य तटे वा कमलयुक्तजलाशयानां तटस्योपरि नगरनिर्माणं करणीयम्। महाभाष्यकारपतञ्जलिः अपि

---

[27] विश्वकर्मवास्तुशास्त्रम्, अ.८.२०–२१

[28] विश्वकर्मवास्तुशास्त्रम्, अ.८.२२

[29] अपराजितपृच्छा,पृ–११३

[30] अपराजितपृच्छा,पृ–११३

[31] अर्थशास्त्र,अधिकरण–२,अ.३,पृ–१०३

वनस्पतियुक्तं नगरं कथयति।[३२] एतेन स्पष्टं भवति यत् नगरनिवेशनं यत्र करणीयं यत्र जलाधिक्यं वर्तते एवं वृक्ष–वनस्पतयः अधिकमात्रायामुपलब्धन्ते। शुक्रनीतिग्रन्थेऽपि नगर–सन्निवेशनार्थं प्रशस्त भूमिलक्षणं दर्शितमस्ति। यथा–

**नानावृक्षलताकर्णे पशुपक्षिगणावृते।**

**सुबह्दकधान्ये च तृणकाष्ठमुखे सदा।।**

**असिन्धुनौगमाकुले नातिदूरे महीधरे।**

**सुरम्यसमभूदेशे राजधानीं प्रकल्पयेत्।।**[३३]

सा भूमिः विविधप्रकारस्य वृक्षलतायुक्ता, पशुपक्षियुक्ता, जलाधिक्यं तथा खाद्यान्नं प्रचुरमात्रायामुपलब्धमस्ति, एवं तृणकाष्ठस्य प्राप्तिः सरलतया भवति तथा पर्वतस्य नातिदूरे न समीपस्थं स्यात्, समीपस्था नदी तथा जलधिः स्थितः स्यात्, सा भूमिः सुरम्या, समतला स्यात् तत्र राजधानी नगरस्य स्थापना करणीया।

शिल्परत्नग्रन्थेऽपि भूम्याः चत्वाराः प्रकाराः वर्णिताः। यथा–

**पूर्णा सुपद्मा च तथैव भद्रा धूम्रा च भूमिर्विहिता चतुर्धा।**[३४]

अर्थात् (१) पूर्णा (२) सुपद्मा (३) भद्रा (४) धूम्रा।

यत्र पूर्णा, सुपद्मा, भद्रा च भूमिः नगरनिर्माणे शुभाभूमिः वर्तते। तथा धूम्रा नाम्नी चतुर्था भूमिः नगरनिर्माणे निन्द्या भूः वर्तते। ग्रन्थकारः प्रत्येकं भूम्याः भिन्नं–भिन्नं लक्षणं निम्नदर्शितरूपेण वर्णयति –

---

32 पतञ्जलिकालिन भारत,पृ–१८८

33 शुक्रनीति, १.२१३–१४

34 शिल्परत्न, ३.४

**(१) पूर्णाभूमिः-**

**प्लक्षन्यग्रोधनिम्बार्जुनवकुलकुलरथा(च् ?स) नाशोकनिष्पा-**

**वाङ्कोलैर्मालतीचम्पकतिलखदिरैः कोद्रवैर्मुद्रिता वा।**

**भूमिर्या भूधराधीश्वरशीखरगता पार्श्वसंस्थाऽथवादेः**

**पूर्णा सा पुष्टिदात्री सुरनिलयसमा कल्पने स्वल्पतोया।।**[३५]

प्लक्षः, न्यग्रोधः, निम्बः, अर्जुनः, बकुलः, कुलरः, मालती, चम्पकः, तिलः, खदिरः, अशोकः,इत्यादयः वृक्षाः स्थिताः भवन्ति, तथा पर्वतशिखरस्योपरि स्थिताः स्यात् अथवा पर्वतस्य समीपस्था स्यात् तथा स्वल्पजलयुक्ता भूमिः पूर्णाभूमिः प्रख्याता।

**(२) सुपद्माभूमिः-**

**कर्पूरागरुनालिकेरतिलकैर्दर्भैः कदम्बार्जुनैर्मालयैः**

**क्रमुक्रेक्षुकेतककुशैः कुन्दराविन्दोत्पलैः।**

**पूर्वोदक्लवशालिनी बहुजला वा या दरीदृश्यते,**

**सेयं शान्तिकरी सुरेशयजने सूक्ता सुपद्मा मही।।**[३६]

यत्र कर्पूरः, चन्दनः, नारिकेलं, कदम्बः, अर्जुनः, तथा केतकी, चमेली, कमलादीनि पुष्पाणि उपलब्धानि भवन्ति, तथा कुशादि प्राप्तिः भवति। यत्र भूमिः पूर्वप्लवा अस्ति वा तत्र जलाधिक्यं वर्तते, सा भूमिः सुपद्मामही प्रकीर्तिता। सा धरा देवयजना एवं शान्तिप्रदायिका वर्तते।

---

[35] शिल्परत्न, ३.५

[36] शिल्परत्न, ३.६

(३) **भद्राभूमिः-**

**तीरं वारिनिधेः श्रिताथ सरितस्तीर्थस्य वा दक्षिणे**

**कीर्णा पुष्पफलप्रवालतरुभिर्योद्यानहृद्यापि वा**

**भद्रा सा परिगीयते वसुमती प्रीतिप्रदा यज्ञनाम्।।** [३७]

समुद्रतटे वा नदी-तीर्थस्य दक्षिणदिशायां स्थिता, सर्वदिक् ब्रीहिक्षेत्रद्वारा सुशोभिता, यज्ञकार्ये प्रयुक्ता, समिधवृक्षयुक्ता, विभिन्नपुष्प-फलादिप्रकीर्णा, उद्यानयुक्ता तथा तडागादियुक्ता भूः भद्राभूः विख्याता।

उपर्युक्ता लक्षणा भूमिः याज्ञिकजनानां कृते प्रीतिप्रदायिका भवति।

**(४) धूम्राभूमिः -**

**अर्कैर्वेणुविभीतकैः स्नुहियुतैः श्लेष्मातकैः पीलुभिः**

**सङ्कीर्णा बहुशर्करा च कठिना गर्भान्विता सोधरा।**

**गृध्रश्येनवराहवायसशिवशाखामृगैःसन्ततं**

**जुष्टा यष्टुरनिष्टदा निगदिता धूमम्मही सूरभिः।।** [३८]

यत्र भूमौ अर्कैवेणुविभीतकैः तथा पीलुभिः स्यात्, सङ्कीणा ,बहुशर्करा, कठिना गर्भयुक्ता, श्येनः, वराहः, गृध्रः आदि पशवः सदैव सन्ति सा भूमिः धूम्राभूमिः कथ्यते। तदुपरान्तं वारुणी, ऐन्द्री, आग्नेयी एवं वायवी भूमीनां भेदानुसारं वर्णनमपि वर्तते।[३९] यत्र प्रथमा तथा द्वितिया वारुणी तथा ऐन्द्री भूमिः नगरादि निवेशोचितास्ति। सा भूमिः

---

[37] शिल्परत्न, ३.७

[38] शिल्परत्न, ३.८

[39] शिल्परत्न, ३.९-११

विविधवृक्षाणामाधिक्यता, बहुपुष्पाणि उद्यानानि एवं जलाशयसहिता तथा धनधान्य प्रदात्री फलद्रुपा भूमिः वर्तते।

अनेन प्रकारेण नगर–सन्निवेशहेतुः भूमिचयनं वा भूमिपरिग्रहणं, भूमिसंग्रहस्य प्रसङ्गे स्थापत्यग्रन्थे सुन्दराणां, श्रेष्ठानां भूमीनां काव्यरुपेण सुन्दरतमं वर्णनं दृश्यते। तेन स्पष्टीक्रियते यथा अस्माकं पूर्वजानां जीवनं प्राकृतिकं प्रकृति समीपस्थमासीत्। वनस्पतिजगत् सर्वदा तेषां सहचरः आसीत्। तेन विना मानव–जीवनमसम्भवमस्ति। जीवनयापनार्थमावश्यकं वस्तूनां पूर्त्यार्थं विशेषं ध्यानं ददाति। भारतीयवास्तुशास्त्रे जलाशयस्य सरिताम् आराधनां क्रियते। नदी–तटे धर्मस्य, ज्ञान–विज्ञानस्य, दर्शनस्य तथा कलायाः चिन्तनं कुर्वन्ति स्म। अनेन प्रकारेण मानवजीवने नदीषु घनिष्ठं महत्त्वं वर्तते। सम्भवतः एतत् कारणार्थं प्राचीनभारते प्रायः अधिकांशं नगरं नदीतटे वा पर्वतशिखरस्योपरि वा पर्वतेन परिवेष्टितस्थलोपरि विकसितमासीत्। यथा नदीतटेषु विकसितानि नगराणि मथुरा, अयोध्या, वटोदरम्, सूर्यपूरम्, भृगुकच्छः, प्रयागः, बनारसः, वाराणसी इत्यादयः। पर्वतशिखरस्योपरि स्थित नगराणि–गिरिनारः, इत्यादि।

भारतीय स्थापत्यस्य धार्मिकं महत्त्वं वर्तते अपितु वैज्ञानिक आधारं महत्त्वमपि अतीव घनिष्ठरूपेण वर्तते। तस्य सिद्धान्तः अतीव सूक्ष्म अध्ययनमेवं स्वानुभवस्योपरि स्थापितं वर्तते।

अस्माकं पूर्वजानां द्वारा स्थापितस्थापत्य सिद्धान्ताः तेषां बृहद् अध्ययनस्य अनुसन्धानस्य द्योतकः अस्ति। तस्य सत्यता एवं प्रासङ्गिकता साम्प्रतयुगे अपि दृश्यते।स्थापत्यशास्त्रं पूर्वोक्त नगरोचितायाः भूम्याः निर्देशने प्राकृतिकसुषमायुक्त रमणीयप्रदेशेन सह भूमिगतखनिजपदार्थयुक्ता भूमिलक्षणमपि कथ्यते। कारणं खनिजपदार्थयुक्ता एवं रमणीयप्रदेशे निवसतां स्वस्थजीवने लौकीकस्य सुखस्य अनुभवं कुर्वन्ति। पर्वतस्योपरि स्थि नगरनिवासी प्राकृतिकरुपेण सुरक्षितः भवति। नानाप्रकारस्य

वृक्षाणां लतादीनामाधिक्यतायाः वायुमण्डलं शुद्धं भवति एचं तस्य स्वास्थ्यमपि सम्यक भवति। नदीनां समीपे स्थिते नगरे वाणिज्यविकासः अपि सुष्ठु भवति।

**►भूपरीक्षाः-**

भवनस्य, जनपदस्य, नगरस्य, ग्रामादीनां निवेशनार्थं देशः, स्थानं वा भूमिचयनं भूपरीक्षायाः अतीव महत्त्वमस्ति। नगरादि निवेशनार्थें भूमौ विविधप्रकारस्य बृहद् वृक्ष-जलाशयस्य प्राचूर्यं तथा उर्वरा सम्पन्नमेवं सुन्दर-मनोहरं वातावरणयुक्तमावश्यकमस्ति। सा भूमिः नगरादि निवेशनार्थ शुभा भूमिः मन्यते। अतः सर्व स्थापत्य-शास्त्रे भूमि-प्रकृति-सम्बन्धितं समुचितं चिन्तनं वर्तते।

भू-परीक्षणविधानस्य द्वौ विभागौ कर्तुं शक्यते-

(१)भूपरीक्षा अर्थात् क्षेत्रस्य उपर्युक्ता दृष्ट्या परीक्षणमर्थात् भूम्याः उपरि परीक्षणम्।

(२)मृत्तिकापरीक्षा अर्थात् भवनं, नगरादि विन्यासं दृष्ट्या मृत्तिकायाः दृढतायाः परीक्षणमर्थात् भूम्याः आन्तरिकं परीक्षणम्।

नगरे गृहविन्यासार्थं मानसारग्रन्थे मानसारमुनिः कथयति-

**श्रीवृक्षनिम्बसे(म्बा)शेकैः संयुक्तं (क्ता) सप्तपर्णकैः।**

**शू(चू)तैस्चापि वृ(वि)षवृक्षैः संयुक्ता च समस्थले (ला)।।**[४०]

यत्र भूस्थलं मानवाः तथा देववासोचितं भवेत्, भूमिः समतला एवं वायुशुद्धिकरणार्थं सहायकाः बिल्व- निम्ब- श्रीवृक्ष- अशोव- सप्तपणा-आमलादि वृक्षैः संयुक्ता भूमिः शुभाभूमिः मन्यते।

मयमतम् इति ग्रन्थेऽपि एतादृशा प्रशस्तभूमिः सम्बन्धितनिर्देशः दत्तोऽस्ति। यथा-

---

[40] मानसार, ४.५

**बिल्वोनिम्बश्च निर्गुण्डी पिण्डितः सप्तपर्णकः।**

**सहकारश्च षड्वृक्षैरारुढा या समस्थला।।**[४१]

मनुष्यालयचन्द्रिकाग्रन्थेऽपि गृहे पूर्व- दक्षिण- पश्चिम- उत्तर दिशासु उप्ताः वृक्षाः क्रमशः कटहलः, पुगीफलम्, श्रीफलम् एवं आम्रवृक्षः एतेषां नामोल्लेखनः कृतम्। तदुपरान्तं रोगनाशकाः विशेषवृक्षाः श्रीवृक्षः, बिल्वः, आमलकं, देवदारुः, पलाशः, अशोकः, चन्दनं, नागकेसरः, आसनं, चम्पा, कत्था, कदलीफलम्, नागलता इत्यादयः वृक्षाः अपि शूभाः मन्यन्ते। यथा हि –

**पूर्वस्यां वकुलो वटश्च शुभदोऽवाच्यां तथोदुम्बर**

**श्चिञ्चा चाम्बुपतौ तु पिप्पलतरुः सप्तच्छदोऽपि स्मृतः।**

**कौबेर्यां दिशि नागसञ्ज्ञिततरुः प्लक्षश्च संशोभनाः**

**प्राच्यादौ तु विशेषतः पनसपूगौ केरचूतौ क्रमात्।।**[४२]

आचार्यवराहमिहिरः अपि स्वस्य बृहत्संहिता ग्रन्थे गृहनिर्माणार्थं प्रशस्त भूमीनां वर्णनं करोति। यथा-

**उदगादिषु प्रशस्ताः प्लक्षवटोदुम्बराश्वत्थाः।।**

**शस्तौषदि द्रुमलता.........................।**[४३]

---

[41] मयमतम्, ३.४

[42] मनुष्यालयचन्द्रिका, अ.१.२२

[43] बृहत्संहिता, ५३.८५,८८

विश्वकर्मवास्तुशास्त्रग्रन्थेऽपि सर्वजनयोग्याभूमिलक्षणं वर्णितं वर्तते। ग्रन्थकारमतानुसारं सृष्टेषु तृणादिमहद्वस्तुषु केचित् वृक्षाः कस्मिश्चित देशविशेषे फलिता भवेयुः। तादृशा वृक्षा युक्ता भूः उत्तमलक्षणयुक्ता भूमिः भवति। [४४]

तदुपरान्तमेतादृशा विशेषता अतिरिक्त भूपरीग्रह पूर्वम् औचिन्त्यानौचिन्त्यपरीक्षणे अनेन प्रकारेण नानाविधभूमीनां वर्णनं तेषां गुणवैशिष्ट्यं वास्तुशास्त्रीयग्रन्थेषु प्राप्यते। तत्र निम्नदर्शिता नाना विधयः परीक्षणमपि अतिवाश्यकमस्ति। तानि च–

(१) प्लवानुसारेण भूपरीक्षणम्

(२) खातानुसारेण भूपरिक्षणम्

(३) रसानुसारेण भूपरिक्षणम्

(४) गन्धानुसारेण भूपरिक्षणम्

(५) शब्दानुसारेण भूपरिक्षणम्

(६) वर्णानुसारेण भूपरिक्षणम्

(७) आकृत्यनुसारेण भूपरिक्षणम्

## ५. आकृत्यानुसारेण भूमिचयनम् –

संहितादिग्रन्थेषु आकृत्यानुसारेण भूमेः षोडशप्रकाराः वर्णिताः वर्तन्ते। गणितशास्त्रेऽपि क्षेत्रमितिरीत्या भूमीनामाकारवर्णनं कृतं विद्यते। तानि च क्षेत्राणि चतुर्भुजत्रिभुजविषमचतुर्भुजरूपाणि। तत्र लक्षणेऽस्मिन् गणितस्यापि महान् उपयोगो दृश्यते, तद्यथा– यदि चतुर्भुजस्थवर्गस्य वा ज्ञानमपेक्षितं भवति तदा ज्याचापनिर्मितक्षेत्रैः अथवा सरलरेखाभिः निबद्धं क्षेत्रम् अस्माभिः गणितेनैव साध्यते, यथा यस्य क्षेत्रस्य चत्वारो भुजाः

---

[44] विश्वकर्मवास्तुशास्त्रम्, अ. ५.१४

समानाः तत् समचतुर्भुजनामकं क्षेत्रं भवति, अथवा यस्य रेखीयक्षेत्रस्य परस्परं सम्मुखे स्थितं भुजद्वयं माने तुल्यरूपे भवेतां तदा तत्क्षेत्रमपि समायतं चतुर्भुजं प्रोच्यते, यस्याः चत्वारो भुजाः वर्गाश्च परस्परं समाः समानान्तराश्च तद्वर्गं, यस्य च चत्वारो भुजाः समानाः कोणाश्च असमानाः अर्थाद् विषमाः तदा विषमायतचतुर्भुजम्। तथैव वृत्तलक्षणेष्वपि एकस्मिन् धरातले व्यासरेखां स्थिरीकृत्य परिभ्राम्यमाणेन यत्क्षेत्रं सञ्जायते तदेव गोलं, तद्यथा –

**विष्कम्भोपरिवृत्तार्द्धे भ्राम्यमाणे तु सर्वतः।**

**गोलक्षेत्राभिधं ज्ञेयं गोलविद्भिः मुनिश्वरैः।।**[४५]

अत एव क्षेत्रे सर्वतो लघ्वात्मको अवयवः बिन्दुरूपः तस्मात् बिन्दोः एव रेखा, रेखातः एव गोलः जायते, यथा हि –

**बिन्दो रेखा ततो वृत्तं वृत्तैर्गोलः प्रजायते।**[४६]

अपि च त्रिभिःकोणैः निर्मितं क्षेत्रं त्रिकोणमुच्यते। स च त्रिभुजः समत्रिभुज–जात्यत्रिभुज विषमत्रिभुजभेदैः त्रिविधः। वृत्तस्या परिधेः खण्डात्मकः भागः एव चापरूपः कथ्यते।

अत एव भूमावाकृत्यानुसारेण भेदान् वर्णयन् प्रसिद्धतया वर्णितमस्ति –

**विस्तीर्णं समभागाश्च संस्थितिं परिकीर्तितम्।**

**चतुरस्त्रं चतुष्कोणं समभागं विभागतः।।**[४७]

---

[45] गोलपरिभाषा, प्र.श्लो.

[46] गोलपरिभाषा, प्र.श्लो.

[47] वास्तुरत्नावली , पृ–१९

विश्वकर्माप्रकाशग्रन्थेऽपि आकारपरत्वेन भूपरिग्रहः शुभाशुभफलं सहितं विशदं वर्णितं दरीदृश्यते। अत्र यथा हि–

**चतुरस्त्रां द्विपाकारां सिंहोक्षाश्वेभरूपिणीम्।**

**वृत्तश्च भद्रपीठश्च त्रिशूलं लिङ्गसन्निभम्।।**

**प्रासादध्वजकुम्भादि देवानामपि दुर्लभ(भा)म्(दुर्ल्लभाम्)।**[४८]

तेषां भुवम् शुभा आकृतीनां वर्णनं क्षेत्रपुरस्सरं निम्नदर्शित रूपेण स्पष्टी क्रियते

| | **आकारः** | **फलम्** |
|---|---|---|
| (१) | चतुरस्त्राभूमिः | उत्तमाभूमिः, धनधान्यप्राप्तिः सुखसमृद्धिं च प्रददाति। |
| (२) | आयताकाराभूमिः | उत्तमाभूमिः, शुभा सर्वसिद्धिदा भवति। |
| (३) | वृत्ताकारभूमिः | शुभा, धनप्राप्तिः। |
| (४) | गजाकारभूमिः | शुभाभूमिः धनदान्यप्रदायिनी। |
| (५) | सिंहाकारभूमिः | –शुभाभूमिः, गुणवतपुत्रप्राप्तिः। |
| (६) | वृषभाकारभूमिः | शुभाभूमिः पशुवृद्धिः। |
| (७) | भद्रपीठाकारभूमिः | शुभाभूमिः धनधान्यप्राप्तिः। |

[48] विश्वकर्माप्रकाश, अ–१.२७–२८

| | | |
|---|---|---|
| (८) | लिङ्गाकारभूमिः | शुभाभूमिः सन्यासीनां कृते श्रेष्ठाभूमिः। |
| (९) | अश्वाकारभूमिः | शुभाभूमिः। |
| (१०) | त्रिशूलाकारभूमिः | शुभाभूमिः। |
| (११) | प्रासादध्वजाकारभूमिः | शूभाभूमिः। |
| (१२) | कुम्भाकारभूमिः | शुभाभूमिः। |

अधुना भूम्याः अशुभाकाराः विश्वकर्माचार्यः निम्नदर्शितश्लोके दर्शयति। यथा हि –

**त्रिकोणं(त्रिकोणां) शकटकारां शूर्पव्यजनसन्निभाम्।।**

**मुरजाकारसदृशां सर्पमण्डूकरूपिणीम्।**

**खराजगरसङ्काशां वक्रा(बका) श्चिपिटरूपिणीम्।।**

**मुद्रराभां तथोलूककाकसर्पसन्निभां तथा।**

**शूकरोष्ट्राऽजसदृशां धनुं(धनुः) परशुरूपिणीम्।।**

**कृकलासशवाकारां दुर्गम्यां च विवर्जयेत्।।** [४९]

अर्थात् –

[49] विश्वकर्माप्रकाश, अ–१.२८–३०

| | आकारः | फलम् |
|---|---|---|
| (१) | त्रिकोणाकारभूमिः | पुत्रप्राप्तिः। |
| (२) | व्यजनाकारभूमिः | अशुभाभुमिः |
| (३) | शूर्पाकारभूमिः | अशुभाभूमिः। |
| (४) | मुरजाकार (तबलाकार)भूमिः | अशुभाभूमिः। |
| (५) | सर्पाकारभूमिः | भयप्राप्तिः, पुत्रनाशः। |
| (६) | मण्डूकाकारभूमिः | भयप्राप्तिः, पुत्रनाशः। |
| (७) | मुद्गराकारभूमिः गर्दभाकारभूमिः) | अशुभाभूमिः। |
| (८) | अजगरसदृशाभूमिः | अशुभाभूमिः। |
| (९) | चक्राकारभूमिः | अशुभाभूमिः। |
| (१०) | चिपिटाकारभूमिः | अशुभाभूमिः। |
| (११) | मुद्गराकारभूमिः | अशुभाभूमिः। |
| (१२) | उलूकाकारभूमिः | अशुभाभूमिः। |
| (१३) | काकसन्निभाभूः | अशुभाभूमिः। |
| (१४) | शूकरसदृशाभूमिः | अशुभाभूमिः। |

| | | |
|---|---|---|
| (१५) | उष्ट्राकारभूमिः – | अशुभाभूमिः। |
| (१६) | धनुषाकारभूमिः | अशुभाभूमिः। |
| (१७) | परशु–आकारभूमिः | अशुभाभूमिः। |
| (१८) | कृकलासाकारभूमिः | अशुभाभूमिः। |
| (१९) | शवाकारभूमिः | अशुभाभूमिः। |

एतावत् अनेनैव प्रकारेण विस्तृतया आकृतिरूपेण भूखण्डानामुल्लेखः प्राप्यते, अनेनैव प्रकारेण शास्त्ररीत्या शुभाशुभं प्रकल्प्य भूचयनं क्रियते। तत्र भूमेः आकारविस्तारं विचार्य नगर–गृहनिर्माणं श्रेयस्करं भवति। तद्यथा बृहद्दैवज्ञरञ्जने अपि वर्णितमस्ति यत्

**आयतेः सिद्धयः सर्वाश्चतुरस्त्रे धनागमः।**
**वृत्ते तु बुद्धिवृद्धिः स्याद्भद्रं भद्रासने भवेत्।।**
**चक्रे दारिद्र्यमित्याहुर्विषमे शोकलक्षणम्।**
**राजभीतिस्त्रिकोणे तु शकटे तु धनक्षयः।।**
**दण्डे पशुक्षयं प्राहुः सूर्पे वासे गवां क्षयः।**
**क्रूमे तु बन्धनं पीडा धनुः क्षेत्रे भयं महत्।।**
**कुम्भाकारे कुष्ठरोगो भवत्येव न संशयः।**
**पवने नश्यति नेत्रं च मुरजे बन्धुविनाशनम्।।**[५०]

[50] वास्तुसारसंग्रहः, ३.१४–१७

आयाताकाराभूमौ निवासेन सर्वसिद्धिः, चतुरस्त्रभूमौ बुद्धिवर्धिनी वस्तुतः यादृशी कुटिलता वक्रता च भूमावाकारे भवति तादृश्येव कष्टप्रदा सा भूमिः भवति यथा चक्राकारे दारिद्र्यं विषमाकारे शोकः काठिन्यं च दण्डाकारे पशुक्षयः मृदङ्गाकारे बन्धुक्षयो भवति यथोक्तं वर्तते। अनेन प्रकारेण स्पष्टतया विस्तृतरूपेण आकृतिभेदेन शुभाशुभभूमीनांचयनं वास्तुशास्त्रेषु विहितं वर्तते।

अपि च वास्तुविज्ञाने –

**उत्तरे लम्बिता भूमिः प्रशस्ता गृहकर्मणि।**

**दक्षिणे लम्बिता सैव दुःखदा विकटा सदा।।**[५१]

या भूमिः उत्तरदिशायां भूजलान्विता अर्थात् यस्याः भूमेः उत्तरभागः लम्बितो वर्तते तदा सा भूमिः भवननिर्माणाय श्रेयस्करी मन्यते।

आचार्यमयानुसारं हि प्रतिपाद्यते यथा तत्रोल्लिखितं यत् –

**देवानां तु द्विजातिनां चतुरस्त्रायताःश्रुताः।**

**वस्त्वाकृतिरनिन्द्या ........................।।**[५२]

यथा चतुरस्त्रा आयताकारा भूमिः देवानामर्थात् देवप्रासादानां, द्विजानां ब्राह्मणक्षत्रियविशां कृते शुभफलप्रदायिका भवति। प्रायशः सर्वेषां कार्याणां वर्णानां च कृते वर्गाकारा आयताकारा वा भूमिः प्रशस्ता। तत्र भूस्वरूपमाधारीकृत्य अपि यदि गृहनिर्माणं क्रियते तदा शुभं भवति, यथा वर्गाकारभूमौ तादृक्स्वरूपं एव गृहं, वृत्ताकारभूमौ वृत्ताकारगृहं निर्मीयते चेत्तदा शुभं भवति।

---

[51] वास्तुविज्ञानम् , ४.२५

[52] मयमतम् , अ.३.१

वास्तुविज्ञानेऽपि प्रोक्तम् –

**चतुष्कोणाः समा यस्याश्चतुरस्त्रा धरा मता।**

**तत्र गेहस्थितिर्नित्यं सर्वसिद्धिकरीस्मृता।।**[५३]

यस्याः भूमेः चत्वारः कोषाः समाः सा भूमिः सर्वसिद्धिप्रदा। तत्र गृहस्थानां कृते लाभप्रदः भवति। तथा –

**अण्डाकारे च भूभागे यस्य गेहस्य निर्मितः।**

**स्त्रोतोभिर्विविधैस्तत्र धनप्राप्तिर्जायते ध्रुवम्।।**[५४]

अण्डाकारभूमौ निवासेन स्त्रोतोभिर्धनप्राप्ति भवति। तथैव–

**चक्राकारेऽथ भूभागे गेहस्थितिः सुमङ्गला।**

**विषमा विकटा भूमिर्दारिद्र्यं च प्रयच्छति।।**[५५]

चक्राकाराभूमिः गृहनिर्माणं मङ्गला, विषमा विकटाकारा दारिद्रप्रदा भवति एव।

अत एव वास्तुविज्ञाने –

**त्रिकोणा शोकदात्री स्याच्छकटाकारा दुःखिनि।**

**संघर्षोत्पादिनी नित्यं धननाशं विधास्यति।।**

**दण्डकारा धरा वित्तं संतति च विनाशयेत्।**

**जीवनं स्याद्भयत्रस्तं दुःखशोकं प्रयच्छति।।**

**शूर्पाकारा शुभा नैव नूनं वाहननाशिनी।**

---

[53] वास्तुविज्ञानम्, ४.२८

[54] वास्तुविज्ञानम्, ४.२९

[55] वास्तुविज्ञानम् , ४.३१

**पशुसम्पत्क्षयं तत्र तुषवत्तूर्णमृच्छति।।**

**गौव्याघ्रबन्ध्नाकारा निम्नपृष्ठा भवेद् धरा।**

**व्याघ्राक्रमणरुपा या भवेन्नित्यममङ्गला।।**[५६]

इत्थमेव भद्रासनात्मिकायां भूमौ गृहनिर्माणेन श्रेष्ठता स्फूर्तिश्च प्राप्यते, त्रिकोणा भूमिः शोकदात्री, शकटाकारा भूमिर्दुःखदायिनी, धनक्षयकरी, दण्डाकारा भूः धनहानिप्रदा, संततिघातिका, सूर्पाकारा भूमिः वाहननाशिनी, पशुधनघातिका, पृष्ठभागे लसिता भूमिः अमङ्गला, धनुषाकारिणी भूमिः धनानां विनाशकारिणी रोगकारिणी, शत्रोर्भयकारिणी भवति।

तत्र निषिद्धाकाराभूम्याः चतुष्कोणाकाराविशिष्टभूमिं संगृह्य पुनराकारः सम्यक् करणीयः। नवीनकरणानन्तरम् अवशिष्टभूम्यां पूर्वोत्तरदिशायां दुर्वा तता च तुलसी च लघुवृक्षाणां विन्यासेन जलादीनां संग्रहनिर्माणं कृत्वा पश्चिमदक्षिणदिशि बृहद्वृक्षाः रोपणीयाः, तदनन्तरं या भूमिः अवशिष्टा तत्र गृहस्य निर्माणं विधेयमिति दिक्।

इत्थम् आकृत्यानुसारेण भूमेः शुभाशुभत्वविचारं विधाय स्वमनोकामरूपेण यथायोग्यभूमौ निर्माणकार्यं करणीयम्।

अन्येऽपि बहवः भेदाः नरपतिजयचर्यास्वरोदयब्रह्मयामलादिग्रन्थेषु वर्णिता वर्तन्ते। किन्तु व्यवहारे अधुना तेषां प्रचलनं नास्ति। अतो अलं विस्तरेण।

## ६. भूर्लक्षणानि–

वास्तुमण्डनम् इति ग्रन्थे सूत्रधारमण्डनः वर्णयति–

**गृहभूमिः शुभा श्वेता कृष्णा स्निग्धोन्नतघना।**

**सुगन्धा षड्रसा चैकवर्णा प्राक्दिशप्लवा।।**

---

[56] वास्तुविज्ञानम्, ३२,३४–३६

**त्रिपञ्चसप्तरात्रेण सर्वशस्य प्ररोहिणी।**[५७]

गृहनिर्माणे श्वेता, कृष्णा, स्निग्धा तथा सघना भूमिः शुभा भवति। भूः सुगन्धा, षड्रसा, एकवर्णा एवं प्राक्दिशप्लवा, यत्र सर्वस्य त्रिपञ्चसप्तरात्रेण प्ररोहिणी धरा उत्तमा वर्तते।

राजवल्लभग्रन्थेऽपि एतावत्–

**श्वेताब्रह्मणभूमिका च घृतवद्गन्धा शुभस्वादिनी**

**रक्तशोणितगन्धिनी नृपतिभूः स्वादे कषाया च सा।**

**स्वादेऽम्ला तिलतैलगन्धिमुदिता पीता च वैश्या मही**

**कृष्णा मत्स्यसुगन्धिनी च कटुका शुद्रेति भूलक्षणम्।।**[५८]

वर्णानुसारेण भूर्लक्षणं निम्नदर्शितं वर्तते–

**(१) ब्राह्मणीभूमिः–**

श्वेतवर्णा, मधुरस्वादयुक्ता, घृतगन्धा एतावत् लक्षणयुक्ता भूमिः ब्राह्मणीभूमिः परिकीर्तिता। सा भूमिः सर्वसुखप्रदा, उत्तमा भूमिः वर्तते।

**(२) क्षत्रियाभूमिः–**

रक्तवर्णा, रक्तगन्धा, कषायस्वादयुक्ता भूमिः क्षत्रियाभूमिः प्रकीर्तिता। सा भूमिः क्षत्रियवर्णस्याधिपत्यदायिनी, राज्यसुखप्रदायिनी, उत्तमा मही वर्तते।

**(३) वैश्याभूमिः–**

---

[57] वास्तुमण्डनम्, अ.१,६४,६५

[58] राजवल्लभः, अ.१.१३

पीतवर्णा, तिलतैलगन्धयुक्ता, अम्लरसयुक्ता भूमिः प्रसिद्धा। सा भूमिर्धनधान्यादिसुखप्रदायिनी, वैश्यवर्णस्ाधिपत्यादि सुखदायिनी उत्तमा भूमिः वर्तते।

**(४) शुद्राभूमिः-**

सा भूमिः कृष्णवर्णा, मस्त्यगन्धा, कटुका, शुद्रवर्णस्याधिपत्यदायिनी भूमिर्वर्तते। भूर्लक्षणंनिम्नदर्शित कोष्टकरुपेण स्पष्टीक्रियते-

| भूर्लक्षणम् | ब्राह्मणीभूमिः | क्षत्रियाभूमिः | वैश्याभूमिः | शुद्राभूमिः |
|---|---|---|---|---|
| **वर्णः** | श्वेता | रक्ता | पीता | कृष्णा |
| **रसः** | मधुरा | कषाया | अम्ला | कटुका |
| **गन्धः** | घृतगन्धा | रक्तगन्धा | तिलतैलगन्धा | मस्त्यगन्धा |
| **फलम्** | सर्वसुखदेया | राज्यप्रदेयाम् | धनधान्यप्रदेम् | निन्दिताम् |
| **वनस्पतिः** | दर्भयुक्ता | मुञ्ज्ञयुक्ता | सर्वतृणयुक्ता | विकटा |
| **वर्णः** | ब्राह्मणः | राज्ञः,क्षत्रियः,सामन्तः | वैश्यः | शुद्रः |

वास्तुशास्त्रे सर्वेषां कृते प्रशस्तााया: भूमेरपि वर्णनं प्राप्यते। तद्यथा-

**स्वादे भवेद्या मधुरा सिताभा सर्वेषु वर्णेषु मही प्रशस्ता।**

**स्नेहान्विता बभ्रुभुजङ्गयोर्वा सौहार्दवत्याखुबिडालयोर्वा।।**[५९]

वास्तुमण्डनग्रन्थेऽपि वर्णपरत्वेन भूर्मिलक्षणानि वर्णितानि दृश्यन्ते। यथा-

---

[59] राजवल्लभः,अ.१.१४

**घृतगन्धा शुभास्वादे श्वेतेष्टा ब्रह्मणस्य भूः।।**

**रक्ता तु शोणितगन्धा तुवरा क्षत्रियस्या।**

**पीताम्लातैलगन्धा च वैश्यवर्णन्नयस्य च।।**

**कटुका मस्त्यगन्धाभू कृष्णाशुद्रेरिऽचलेष्वपि।**

**शरावेद्यृतपूर्णोऽस्मिन्नामेवर्त्तिचतुष्टये।।**

**पूर्वाद्यादीप्यते वर्ति विप्रादीनां शुभा मही।**[६०]

सूत्रधारमण्डनः चतुर्वर्णानाम् आवासस्य कृते योग्याभूम्याः वर्णनम् उपरोक्तरूपेण कृतम्।

वशिष्ठसंहिता ग्रन्थे आचार्य वशिष्ठमतानुसारेण –

**श्वेतस्थानं द्विजानामीषद्रक्तं भूमिर्महीभुजाम्।**

**विशां पीतं च चतुर्थानां कृष्णवर्णं शुभप्रदम्।।**[६१]

**►वर्णानुसार भूर्लक्षणम्–**

भारतीयसमाजे भीन्न–भिन्नवर्गविभाजनं तेषां कर्माधारेण भवति। तेषामाधारेण गृह–विन्यासस्य कृते पृथक्–पृथक् वर्णाभूमिः प्रशस्ता मन्यते। एतादृशा भूमिः गुण–कर्म–स्वभावदायित्वबोधिका अस्ति। यथा– ब्राह्मणानां कृते श्वेताधरा तेजः, तपः, उत्कृष्ट ज्ञानमेवं पवित्रता दर्शयति। क्षत्रियाणां कृते रक्ता मही युद्धकौशलं, युद्धभूमि, सैनिकवृत्तिः रक्षकः इत्यादयाः गुणाः प्रदर्शयति। वैश्यानां कृते पीतवर्णाभूः स्वर्णसम सम्पत्तिः, धनं तथा ऐश्वर्यप्रदायका किर्तिता। शूद्राणां कृते कृष्णवर्णा भूमिः तुच्छता एवं दासत्वदायिका भवति।

---

[60] वास्तुमण्डनम्, अ.१.६५–६८

[61] वशिष्ठसंहिता, ३९.३

भू: वर्ण दृष्ट्या भू: एकस्मिन्नेव स्थाने भिन्न–भिन्न वर्णस्य न भवेत् किन्तु

**'.......... चैकवर्णायुक्।'**[62] एकसमानवर्णा भवेत्।

एतादृशा–

**धवलं रक्तवर्णं च स्वर्णं कृष्णं कपोतकम्।**[६३]

तथा– **श्वेता रक्ता च पीता च कृष्णं कपोत सन्निभा।।**[६४]

एतावत् भूमि: शुभा भू: वर्तते।

भोजेन समराङ्गणसूत्रधारग्रन्थे भूम्या: भिन्न–भिन्नवर्णानामुल्लेखं कृत्वा श्वेतवर्णा भूमि: विप्रवर्णानां निवासनार्थं प्रशस्ता दर्शिता तथा एतेन प्रकारेण रक्ता, पीता तथा कृष्णा भूमि: क्रमश: क्षत्रियवर्णानां, वैश्यवर्णानामेवं शुद्रवर्णानां कृते उत्तमा वर्णितम्। यथा–

**सिता रक्ता च पीता च कृष्णा चैव क्रमान्मही।**

**विप्रादीनां च हि वर्णानां सर्वेषामथवा हिता।।**[६५]

विश्वकर्मवास्तुशास्त्रम् इति ग्रन्थेऽपि एतादृशानां भिन्न–भिन्न वर्णानां जनानां कृते भिन्न–भिन्नवर्णाया: भूम्या: लक्षणं वर्णितं वर्तते। यथा–

**.......भूमिर्देवविप्रहिता। .........श्वेतवर्णा च भूरपि।।**

**........रक्तवर्णा च भूरपि।। विपुला लोहयुग्मभूमि: क्षत्रियाणां हितप्रदा।।**

**नातिकृष्णा न रक्ता च .....। भूरियं वैश्यजातीनां बलसम्पत्करा मता।।**

---

62 मानसार, अ.४,पृ–८

63 मानसार,अ.३,पृ–१०

64 मयमतम्, ३.५

65 समराङ्गणसूत्रधार:, अ.८.४८

**(कटुमृस्त्ना कृष्णवर्णा......। .........शुद्राणां क्षेमकारीणी)।**[६६]

अर्थात् देवालयार्थं ब्राह्मणगेहार्थं च श्वेतवर्णाभूमिः शुभप्रदा योग्येति। रक्तवर्णाभूमिः तथा कनकादिविपुललोहखनियुक्ता च भूमिः क्षत्रियाणां जयादिसर्वसम्पत्कारीणी भवति । नातिकृष्णा भूः तथा नातिरक्तवर्णा भूमिः वैश्यानां सर्वसम्पत्प्रदा भवति। कटुमृद् युक्ता, कृष्णवर्णा च भूमिरशूद्रजातीनां सर्वक्षेमकारिणी भवति।

अपराजितपृच्छाग्रन्थे वर्णानुसारेण भूर्लक्षणं येषां येषां चतुर्वणानां वर्णानुसारुपमस्ति तेषां तेषां वर्णानां संज्ञानुरूपं ज्ञायते। तदनुरूपम्-

**श्वेता च ब्राह्मणी भूमि रक्ता वै क्षत्रियः स्मृता।**

**पीतवर्णा भवेद्वैश्या शूद्री तु कृष्णवर्णिनी।।**[६७]

शिल्परत्नग्रन्थेऽपि विप्रादिविभिन्नवर्णानां कृते प्रशस्ता भूमिः प्रतिपादितमस्ति-

**श्वेतापाटलपीतमेचकरुचश्च .......।**[६८]

वास्तुसौख्यम् ग्रन्थे -

**सितेषद्रक्तहरितकृष्णवर्ण यथाक्रमम्।**[६९] इति वर्णितमस्ति।

**श्वेता रक्ता तथा पीता कृष्णा चैव यथाक्रमम्।**

**विप्रादिनां प्रशस्ता स्यान्मृत्तिका च ततो द्विजः।।**[७०]

मस्त्यपुराणे अपि-

---

[66] विश्वकर्मवास्तुसास्त्रम्, अ.५.८-१३

[67]अपराजितपृच्छा, ५१.५०

[68] शिल्परत्न, अ.३,पृ-१०

[69] वास्तुसौख्यम्, भाग-२,पृ-४

[70] विष्णुधर्मोत्तरपुराणम्, खण्डः-२,२९.८

**श्वेता रक्ता तथा पीता कृष्णा चैवानुपूर्वशः।।**

**विप्रादेः शस्यते भूमिरतः कार्य परीक्षणम्।**[७१]

इति वर्णनं प्राप्यते।

► **रसोचितं भूर्लक्षणम्-**

नगर-भवन विन्यास हेतु भूपरीक्षा रसाधारेणापि क्रियते। अतः शिल्पशास्त्रे रस दृष्ट्या भूपरीक्षणं मानसारग्रन्थे-

**षड्भैश्च समायुक्ता सर्वसम्पत्प्रदा धरा।।**[७२]

इति वर्णनं दृश्यते। मयमतम् ग्रन्थेऽपि-

**तिक्ता च कटुका चैव कषायलवणाम्लका।।**

**मधुरा षड्पेता सर्वसम्पत्करी धरा।**[७३]

तथा समराङ्गणसूत्रधारग्रन्थानुसारम्-

**स्वादुः कषाया तिक्ता च कटुका चेत्यनुक्रमात्।**

**वर्णानां स्वादतः शस्ता सर्वेषां मधुराथवा।।**[७४]

विप्रादिचतुवर्णानां कृते रसोचिता भूविभाजनसम्बन्धि समराङ्गणसूत्रधारग्रन्थमतानुसारं मधुरा भूमिः ब्राह्मणानां कृते, कषायभूमिः क्षत्रियाणां कृते, तिक्ता धरा वैश्यजनानां कृते एवं

---

[71] मस्त्यपुराणम्, २५३.११-१२

[72] मानसार,अ.४.६

[73] मयमतम्, अ.३.५-६

[74] समराङ्गणसूत्रधारः, अ.८.४९

कटुका भूमिः शुद्राणां कृते शुभा भूमिः वर्तते। अथवा मधुरा धरा सर्ववर्णानां कृते भवननिर्माणार्थे प्रशस्ता मन्यते। यथा–

**वर्णानां स्वादतः शस्ता सर्वेषां मधुराथवा।।**[७५]

विश्वकर्मवास्तुशास्त्रे अपि –

**माधुर्यमृत्तिका भूमिर्देवविप्रादिहितप्रदा।**

**कषायमृत्तिका भूमि................।।**

**(कटुमृत्स्ना......................)।।**[७६]

मधुराभूः देवविप्रादिनां कृते, कषाय वसुन्धरा क्षत्रियाणां कृते, कटुका शुद्राणां कृते प्रशस्ता इति दर्शिता।

मानसारग्रन्थे –

**माधुर्यं च कषायं ब्रह्मणानां शुभप्रदम्।**[७७]

तथा– **........तिक्तम्..**[७८]**, अम्लरसान्वितम्, एवं कटुकारसम्।**[७९]

मयमतग्रन्थानुसारम्–

**कषायमधुरं सम्यक् कथितं तत् सुखप्रदम्।**[८०]

---

75 समराङ्गणसूत्रधारः, अ.८.४९

76 विश्वकर्मवास्तुशास्त्रम् , अ.५.८–९,१२

77 मानसारः, अ.३.१०

78 मानसारः, अ.३,पृ–६

79 मानसारः, अ.३,पृ–७

80 मयमतम्, अ.२.११

तथा- **तिक्तरसान्वितम्, अम्लरसान्वितम्, कटुकरसम् ।**[८१]

अपराजितपृच्छाकारः अपि एतत्विषये वर्णयति-

**ब्राह्मणी मधुरास्वादा कषाया क्षत्रिया तथा।**

**क्षारस्वादा भवेद्वैश्या शूद्री स्यात्कटुका तथा।**[८२]

तथा शिल्परत्नग्रन्थेऽपि –

**मोदाः स्वादुकषायतिक्तकटुकास्वादान्विताश्च स्मृताः।**[८३]

मनुष्यालयचन्द्रिका ग्रन्थेऽपि एतादृश तुलनीयः-

**मोदाः स्वादुकषायतिक्तकटुस्वादान्विताश्च स्मृताः।।**[८४]

विष्णुधर्मोत्तरपुराणे-

**मधुरा च कषाया च अम्लोपणरसा तथा।**[८५]

तथा मस्त्यपुराणे-

**विप्राणां मधुरास्वादा कटुका क्षत्रियस्य तु।।**

**तिक्ता कषाया च तथा वैश्यशूद्रेषु शस्यते।**[८६]

मयमतम् इति ग्रन्थानुसारम्-

---

[81] मयमतम्, अ.२,पृ-८

[82] अपराजितपृच्छा, ५१.५२

[83] शिल्परत्नः, अ.३,पृ-१०

[84] मनुष्यालयचन्द्रिका, १.२९

[85] विष्णुधर्मोत्तरपुराणम् , खण्ड-२,२९.९

[86] मस्त्यपुराणम्, २५३.१२-१३

**तिक्ता च कटुका चैव कषायलवणाम्लका।**

**मधुरा षड्सोपेता सर्वसम्पत्करी धरा।।**[८७]

भिन्न–भिन्न वर्णानां कृते भिन्न–भिन्न रसयुक्ता भूमिः प्रशस्ता निर्देशितम्। इति सर्वेषु ग्रन्थेषु प्रदत्तं निर्देशानुसार स्पष्टं भवति यत् प्राचीनभारते भवन–गृह–विन्यासनार्थं वर्णानुकूलं भूव्यवस्था आसीत्।

**►गन्धोचित् भूर्लक्षणम्-**

समराङ्गणसूत्रधारग्रन्थे भूम्याः गन्धानुसारेण भू–परीग्हणार्थं निम्नदर्शित रीत्या वर्णनं प्राप्यते। तद्येथा–

**कङ्कुमागुरुकर्पूरस्पृक्कैलाचन्दनादिभिः।**

**सुगन्धा मिश्रितैरेभिः पृथक्स्थैर्वा वसुन्धरा।।**

**कल्हारपाटलाम्भोजमालतीचम्पकोत्पलैः.**

**स्थलाम्बुप्रभवैश्चान्यैः सुगन्धा कुसुमैस्तथा।।**

**गोमूत्रगोमयक्षीरदधिमध्वा ज्यगन्धभाक्।**

**समानगन्धा मदिरामाध्वीकेभमदासवैः।।**[८८]

यत्र कुङ्कुम– अगरु– कर्पूर– स्पृक्कैला– चन्दनादि मिश्रितैरेभिः पृथक्–पृथक् रूपेण सुगन्धा वसुन्धरा अस्ति, कमलं, पटलं, रक्तकमलं, मालती, चम्पकैः, इत्यादिभिः स्थलाम्बुप्रभवैश्चान्यैः कुसुमैस्तथा सुगन्धा भूमिः अस्ति, गोमूत्रें, गोमय–क्षीरं, दधि, मधु एवं आज्यादिगन्धभाक् तथा मदिरा, माध्वक, गजमदासवैः, समानगन्धा धरा , भूमिः

[87] मयमतम् , अ.३.५–६

[88] समराङ्गणसूत्रधारः, अ.८.४४–४७

शालिधान्यपिष्टगनदधैश्च धान्यगन्धैश्च, प्रशस्ताखिलवर्णा एतादृशा धरा विप्रादिसर्ववर्णानां निवासनार्थं प्रशस्ता ख्याता।

विश्वकर्मवास्तुशास्त्रम् इति ग्रन्थेऽपि भगवन् विश्वकर्मा कथयति–

**मधुगन्धा पुष्पगन्धा सर्पिगन्धा च भूरपि।**

**स्थिरवर्णा च भूश्शस्त सर्ववास्तुषु किर्तिता।।**[८९]

मानसारग्रन्थेऽपि –

**धेनुभिश्च समायुक्तं(क्ता) किं च पुंनागजातिभिः।**

**सरसीरुह्यधान्यैश्च पाटलीपुष्पगन्धकैः।।**[९०]

मयमतग्रन्थानुसारम्–

**पुत्रागजातिपुष्पाब्जधान्यपाटलगन्धकैः।।**

**पशुगन्धसमा........................।**[९१]

तथा

**सा शुभा सर्ववर्णानां सर्वसम्पत्करी धरा।**

**दध्याज्यमधुगन्धा च ..................।।**[९२]

मानसारग्रन्थे–

**सा भूमिः ब्रह्मणादीनां वर्णानां सम्पदावहा।।**

---

89 विश्वकर्मवास्तुशास्त्रम्, अ.५.२१

90 मानसार,अ.४.३

91 मयमतम्, अ.३.२–३

92 मयमतम्, अ.३.१०

**मधुतैलाज्यगन्धाश्च (च)...............।।**[९३]

**►अङ्कुरोचित् भूर्लक्षणम्-**

भारतीयवास्तुशास्त्रे नगर-गृहादिसन्निवेश: प्राक् वास्तुभूमौ बीजवपनं क्रियते। तस्य बिजाङ्कुर: कदा अङ्कुरीत: भवति तेनाधारेण भूपरीक्षणं परम्परा प्रचलिता आसीत्।
वस्तुत: एतादृशे परीक्षणे वैज्ञानिकं रहस्यमस्ति।

बीजाङ्कुरद्वारा धराया: प्रवर्धनशीलताया: (फलद्रुपताया:) ज्ञानप्राप्ति: भवति। बीजाङ्कुरसमयाधारे विश्वकर्मवास्तुसास्त्रग्रन्थे भूम्या: त्रिभि: प्रकारै: वर्गीकृतं दृश्यते। यथा-

**सा भूमिरुत्तमा ज्ञेया त्रिरात्राङ्कुरवर्धिनी।**

**सा मध्यमा च विज्ञेया पञ्चरात्राङ्कुरप्रदा।।**

**मन्दाङ्कुरप्रदा भूमिरधमा चेति गद्यते।**

**सा वर्ज्या सर्वकार्येषु बीजानां क्षयकारिणी।।**[९४]

बीजवपनान्तरं त्रिरात्रिपर्यन्तम् अङ्कुरं दृश्यते सा भूमिरुत्तमा कीर्तिता। पञ्चरात्राङ्कुरप्रदा भू: मध्यमा ज्ञायते। मन्दाङ्कुरप्रदा भू: अधमा कथ्यते। सा भूमि: सर्वकार्येषु त्याज्या भूमि: मन्यते।

समराङ्गणसूत्रधारग्रन्थेऽपि-

**अनूषरा बहुतृणा शस्ता स्निग्धा.......**[९५] । धरा उत्तमा लक्षणायुक्ता वर्णिता।

---

93 मानसार,अ.४.१०-११

94 विश्वकर्मवास्तुशास्त्रम्, अ.५.२१-२२

95 समराङ्गणसूत्रधार:, अ.८.६५

एतावत् मानसारग्रन्थेऽपि–

**संयुक्तं (क्ता) सर्वबीजानां वर्धनं (ना) .......।**

**निविडा(ड) स्निग्धसंयुक्ता....................।**[९६]

मयमतम् इति ग्रन्थे च –

............ **श्रेष्ठा सर्वबीजप्ररोहिणी ।**

...............**स्निग्धा**...........।।[९७]

धरायाः सर्वबीजप्ररोहिणी तथा सघनस्निग्धा भूर्लक्षणं वर्णितं वर्तते।

मनुष्यालयचन्द्रिका ग्रन्थेऽपि–

**स्निग्धा.............आशुबीजोद्गमा।**

**सम्प्रोक्ता बहुपांसुरक्षयजला .......।।**[९८]

उपरोक्तम् अङ्कुरोचित्  लक्षणाभूमिः प्रशस्ता मन्यते।

**►स्पर्शाधारोपरि भूर्लक्षणम्–**

नगर–भवनादिसन्निवेशे धरायाः उपयुक्तं परीक्षणं स्पर्शद्वारा अपि क्रियते। स्पर्शपरीक्षणस्याधारः ऋतौ आधारितमासीत्। समराङ्गणसूत्रधारग्रन्थ दृष्टया–

---

96 मानसारः, अ.४.४

97 मयमतम् , अ. ३.३

98 मनुष्यालयचन्द्रिका, अ.१.१७

**धर्मागमे हिमस्पर्शा या स्यादुष्णा हिमागमे।**

**प्रावृष्युष्णहिमस्पर्शा सा प्रशस्ता वसुन्धरा।।**[९९]

या धरा ग्रीष्मागमने शीतला, हिमागमने उष्णा, वर्षायां शीतोष्णा (समशीतोष्णा) प्रतीता भवति सा मही प्रशस्ता प्रकीर्तिता।

**............तुल्या च शीतोष्णयोः।**[१००]

इति शील्परत्नग्रन्थे वर्णितं वर्तते। तेन प्रकारेण मयमतम् इति ग्रन्थेऽपि दृश्यते–

**सुखसंस्पर्शनान्विता।**[१०१]

तथा मानसारग्रन्थेऽपि–

**सुखसंस्पर्शना भवेत्** ।।[१०२]

उपरोक्तलक्षणयुक्ता वसुन्धरा वास्तुशास्त्रस्यग्रन्थेषु उत्तमा दर्शिता।

**►गन्धोचित् भूर्लक्षणम्**–

सर्वसाधारणभवनानां कृते सर्वसाधारणभूचयनं भोजदेवस्य परम वैशिष्टयमस्ति। परन्तु अन्यशिल्पशास्त्रे गन्धाधारितविभिन्नवर्णानां कृते भूमिवर्गीकरणं दृश्यते। यत्र कदाचित् या भूमिः यस्य वर्णस्य जानानां कृते उपयुक्ता मन्यते तदनुरूपमेवं संज्ञाप्रदानं क्रियते। यथा–

**घृतगन्धा भवेद्विप्री राज्ञी रक्तानुगन्धिनी।**

**क्षारगन्धा भवेद्वैश्या शूद्री विष्टानुगन्धिनी।।**[१०३]

---

[99] समराङ्गणसूत्रधारः, अ.८.५०

[100] शिल्परत्न, अ.३, पृ–८

[101] मयमतम् ,अ.३.३

[102]मानसारः, अ. ४.४

अर्थात् घृतगन्धा भूमिः विप्राभूमिः ज्ञायते। सा भूः विप्रवर्णानां कृते प्रशस्ता मन्यते। एतावत् रक्तवर्णाभूमिः राज्ञी अर्थात् क्षत्रियवर्णानां कृते उत्तमा वर्तते। क्षारगन्धा भवेद्वैश्या, सा भूमिः वैश्यवर्णानां कृते प्रशस्ता भवति। विष्टानुगन्धिनी भूः शूद्री भूः कथ्यते, सा भूमिः अधमाभूमिः मन्यते।

वास्तुसौख्यम् ग्रन्थे किञ्चित् भिन्नता दृश्यते–

**सुमध्वाज्यान्नपिशितं गन्धं विप्रानुपूर्वकम्।** [१०४]

मधुगन्धा भूमिः ब्राह्मणानां कृते, घृतगन्धा भूमिः क्षत्रियाणां कृते, अन्नगन्धा भूमिः वैश्यानां कृते तथा रक्तगन्धा भूमिः शूद्राणां कृते सुखप्रदायिका रुपेण विवेचितमस्ति।

विष्णुधर्मोत्तरपुराणे–

**घृतासुगन्नमद्यानां तुल्यगन्धा तथैव च।** [१०५]

भिन्न–भिन्न गन्ध दृष्ट्या घृत–रक्त –अन्न–मद्यगन्धा भूः क्रमशः विप्राणां, क्षत्रियाणां, वैश्यानां तथा शूद्राणां कृते शुभा भवन्ति इति वर्णितं वर्तते।

तथा मनुष्यालयचन्द्रिकाग्रन्थेऽपि–

**.............आज्यसृगन्नासवा।** [१०६]

इति वर्णितं दृश्यते।

## ७. भूमिप्लवविचारः -

---

[103] अपराजितपृच्छा, ५१.५१

[104] वास्तुसौख्यम् , भाग–२, पृ–४

[105] विष्णुधर्मोत्तरपुराणम्, खण्ड–२,२९.९

[106] मनुष्यालयचन्द्रिका, अ.१.२९

अत्र का भूमिः कस्यां दिशि प्लाविताऽस्ति इति विचारपूर्वकं भू-परीक्षणं करणीयम्। भू-प्लव दृष्ट्या पूर्वप्लवा, उत्तरप्लवा,पूर्वोत्तरप्लवा भूमिः गृह-विन्यासार्थं प्रशस्ता उपयुक्ता मन्यन्ते। अतः सर्व शिल्पशास्त्रकाराः वास्तुशास्त्रकाराः उपरोक्त प्लवा भूम्याः प्रशंसा क्रियन्ते। राजाभोजः समराङ्गणसूत्रधारग्रन्थे –

**.......................उत्तरप्लवा।।**

**प्रागीशानप्लवा सर्वप्लवा वा दर्पणोदरा।**[१०७]

तथा युक्तिकल्पतरुग्रन्थेऽपि-

**इशानपूर्वप्लवनो मध्यस्थानसमुन्नतः।**[१०८]

एतादृशी मही नगरगृहनिर्माणार्थं प्रशस्ता भवति।

मयमतम् इति ग्रन्थानुसारेण-

**देवानां तु द्विजातिनां ....................।**

**.................सावाक्प्रत्यग्दिक्समुन्नता।।**[१०९]

देवानां तथा द्विजानां कृते भूमिः दक्षिणे वा पश्चिमे समुन्नता भवेत् सा भूमिः शुभा मन्यते।

मनुष्यालयचन्द्रिकाग्रन्थेऽपि-

**...................प्राक्पल्वा।**[११०]

---

[107] समराङ्गणसूत्रधारः , अ.८.६५-६६

[108] युक्तिकल्पतरु, नगरयुक्ति, १५६

[109] मयमतम् , अ.३.१

[110] मनुष्यालयचन्द्रिका, १.१७

इति दर्शितम्। तथा विभिन्नदिशायामुन्नता भूमौ निर्मितस्य भवनस्य समृद्धिकाल: अपि निर्दिष्टः। तथोक्तम्–

**मध्योच्चायां धरित्र्यां प्रथममथ गृहे कल्पिते स्याद् दशाब्दं–**

**वृद्धिः प्रागुन्नतायामपि हुतवाह्याम्योन्नतायां शताब्दम्।**

**साहस्त्राब्दं निर्ऋत्युन्नतधरणीतले वारुणे स्यात् तदर्थं**

**शेषास्वर्काष्टकाः शरद इह ततः स्वोक्तरुपं फलं स्यात्।।** [१११]

उपरोक्त श्लोकस्य अर्थः निम्नदर्शित कोष्टकरुपेण स्पष्टी क्रियते। एतत्प्रदर्शनम्  –

| उन्नतदिशा | फलमेवं वृद्धिर्योग्यवर्षम् |
|---|---|
| मध्यस्थाने वा पूर्वदिशायामुन्नता | १०वर्षपर्यन्तं वृद्धिकारिका |
| आग्नेयकोणे वा दक्षिणे उन्नता | १००वर्ष पर्यन्तं विकासकारिका |
| नैर्ऋत्यकोणे उन्नता | १०००वर्ष पर्यन्तं विस्तारकारिका |
| पश्चिमदिशायामुन्नता | ५००वर्ष पर्यन्तं वृद्धिप्रदायिका |
| वायव्यकोणे उन्नता | १२वर्ष पर्यन्तमुन्नतिदायिका |
| उत्तरदिशायामुन्नता | ८वर्ष पर्यन्तं समृद्धिदायिका |
| ईशानकोणे उन्नता | ६वर्ष पर्यन्तं वृद्धिदायिका |

तथा मानसारग्रन्थेऽपि यथा हि–

**दक्षिणे पश्चिमे चैव चोन्नतं चतुरश्रकम्।।**

**तद्वस्तु जायते वाऽपि देवानां मनुजः(ज)क्रमात्।** [११२]

[111] मनुष्यालयचन्द्रिका, १.१९

विभिन्नदिशायामुन्नता भूमौ निर्मितस्य भवनस्य समृद्धिकाल: अत्र बृहत्संहितायामपि विद्यते। यथा हि –

**उदगादिपलवमिष्टं विप्रादीनां प्रदक्षिणेनैव।**

**विप्र: सर्वत्र वसेदनुवर्णमथेष्टमन्येषाम्।।**[११३]

अत: ब्राह्मणा: चर्तुदिक्षु प्लवाभुम्युपरिनिवासं कर्तुं योग्य: परन्तु शेषवर्णेषु पूर्वदिशायामधोगता भूमि: क्षत्रियाणां कृते, दक्षिणप्लवा भूमि: वैश्यानां कृते तथा पश्चिमे अधोगता भूमि: शूद्राणां कृते शुभा मन्यते। वस्तुतस्तु ब्राह्मणाणां कृते सर्वासु दिशासु भूमिरधोगता भवेत्तस्यामपि भूमौ गृहनिर्माणं कर्तुं शक्यते ।

एवञ्च बृहद्वास्तुमालायामपि –

**सौम्यादिप्लवभूतले विरचयेद्विप्रादिकोऽग्रधोऽखिले।**

**नान्येषां नयमोऽथ यत्र निखिला कुर्युर्गृ ह्यत्स्थिरम्।।**[११४]

**भूमे: अष्टदिक्प्लवफलम्-**

**श्रियं दाहं तथा मृत्युं धनहानिं सुतक्षयम्।**

**प्रवासं धनलाभं च विद्यालाभं क्रमेण च।।**

**विदध्यादचिरेणैव पूर्वादिप्लवतो मही।**

**मध्यप्लवा मही नेष्टा न शुभा प्लवतत्परा।।**[११५]

---

[112] मानसार,अ.४.१–२

[113] बृहत्संहिता, अ.५३.९१

[114] बृहद्वास्तुमाला, पृ–९.४०

[115] बृहद्वास्तुमाला, पृ–९.३५–३६

अर्थात् पूर्वैशान्यादिष्टधिशाक्रमेण प्लावितानां भूमीनां फलं क्रमशः लक्ष्मीदाहत्वं मृत्युर्धनहानिः पुत्रहानिः प्रवासो धनलाभो विद्यालाभश्च भवति। मध्यप्लवा भूमिः नेष्टा भवति। तथा तत्रेव –

**शम्भूकोणे प्लवा भूमिः कर्तुः श्रीसुखदायिनी।**

**पूर्वप्लवा वृद्धिकरी धनदा तूत्तरप्लवा।।** [११६]

एवमेव ईशानकोणे प्लवा धरा लक्ष्मीं सुखं च ददाति। तदर्थं राजवल्लभग्रन्थेऽपि भूमिप्लवविचारो प्रदर्शितमस्ति यथा हि–

**भूमेः प्राक्प्लवनं च शङ्करककुप्सौम्याश्रितंसौख्यकृत्**

**वह्नौवह्निभयं च यमे मरणं चौराद्भयंराक्षसे।**

**वायव्येप्लवनच च धान्यहरणं स्याच्छोदकवारुणे**

**विप्रादेरनुवर्णतश्च सुखदं सृष्टेः क्रमात्सौम्यतः।।** [११७]

भूमिप्लवफलं निम्नदर्शितमस्ति–

पूर्व– उत्तरेशानदिक्प्लवा भूमेः सुखप्राप्तिः भवति सा भूमिः शुभा मन्यते। तथा अग्निकोणे प्लवा भुमेः दाहः तथा अग्निभयम्, दक्षिणदिक्प्लवा भूमेः मृत्युभयम्, नैर्ऋत्यकोणेप्लवा भूमेः चोराद् भयं, वायव्यप्लवा भूमेः धनधान्यनाशः,पश्चिमप्लवा भूमेः शोकप्राप्तिः भवति ।

अपराजितपृच्छाग्रन्थेऽपि भू–प्लव सम्बन्धितम् –

**भूमिनामष्टप्लव......................।** [११८]

---

[116] बृहद्वास्तुमाला, पृ–९.३७

[117] राजवल्लभः, अ.१.१७

इतिउल्लेखं कृत्वा पूर्वप्लवा, अग्निप्लवा,व दक्षिणप्लवा, नैर्ऋत्यप्लवा, पश्चिमप्लवा, वायुप्लवा, उत्तरप्लवा तथा इशानप्लवा इति अष्टदिक्प्लवानां वर्णनं प्राप्यते। एवञ्च –

**पूर्वप्लवा धरा श्रेष्ठाः ह्यायुः श्रीबलवर्धिनी।**

**सर्वसम्पत्करी पुंसा प्रासादानां विभूतिदा।।**

**राज्यपूज्या सदानन्दा प्राक्प्लवाचेद्भवेन्मही।**

**सा विद्या धनसम्पन्ना सर्वलोकहितावहा।।**

**विनयमाचारसम्पन्नपुत्रपौत्रादिसङ्कुला।**

**नीरोगा दानशीला च विशिष्टजनसेविता।।**

**पूर्वप्लवा तु या भूमिः शोभना सा प्रकीर्तिता।।** [११९]

तथा विश्वकर्माप्रकाशग्रन्थे विश्वकर्मणः वर्णयति यत्–

**पूर्वप्लवे भवेल्लक्ष्मीः .............।**

**उत्तरे वंशवृद्धिः स्यादीशाने रत्नसञ्चयः।।** [१२०]

इति फलं प्राप्यते।

तद्यथा प्लवमार्गो वीथिः कथ्यते। बृहद्वास्तुमालाग्रन्थानुसारं यथा हि –

पूर्वतः पश्चिम प्लवे जलवीथिः कथ्यते। तत्फलं शोकप्राप्तिः।

पश्चिमायामुच्चा भूमिः पूर्वस्याञ्चनिम्ना गोवीथिः ज्ञायते। तत्फलं शुभमिति। उत्तरस्यामुच्चया दक्षिनायां नीचा भूमिः यमवीथिः मन्यते। तत्फलं अशुम्।

---

[118] अपराजितपृच्छा, ५१.१३

[119] अपराजितपृच्छा, ५१.१३–१४,२३–२४

[120] विश्वकर्माप्रकाशः , २.१५–१६

दक्षिणस्यां तु उच्चा उत्तरस्यां नीचा गजवीथिः ज्ञायते। तत्फलं शुभमिति।

ईशानकोणे उच्चा नैर्ऋत्यकोणे नीचा भूतलं भूतवीथिः कथ्यते। सा वीथिरशुभा वीथिः।

आग्नेयोच्चं वायव्ये नीचं भूः नागवीथिर्ज्ञायते। सा वीथिः शुभवीथिः प्रशस्यते।

वायव्ये उच्चमग्निकोणे नीचं भूतलं वैश्वानरी वीथिः कथ्यते। सा वीथिः शुभा मन्यते।

नैर्ऋत्यकोणे उच्चं ईशानकोणे नीचं धरा धनवीथिः कीर्तितः। सा वीथिःधनदा वीथिः प्रख्याता।

इन्द्राग्यन्तरमुच्चं वरुणवायव्योः नीचं स्यात् वसुन्धरा पितामहवास्तुः प्रशस्यते। विद्यान्नराणां निवासे कुरुते शुभम्।

याम्याग्नन्तरमुच्चं मारुतसोमयोनीचं स्यात् भूः सुपथा वीथीर्ज्ञायते। सा भूमिः सर्वकर्मणि प्रशस्ता भवति।

सोमेशान्तरं नीचं निर्ऋतिदक्षिणयोः उच्चं धरा स्यात् सा भूमिदीर्घायुर्नाम वास्तुः ख्यातः। तत्फलं कुलवर्धनमिति।

ईशानेन्द्रान्तरं नीचं चरुणस्योच्चं भूतलं पुण्यकं नाम वास्तुर्ज्ञायते। सा भूमिः ब्राह्मण–क्षत्रिय–वैश्यानां निवासने शुभावहा।

इन्द्राग्न्योन्तरं नीचं वायुवारुणे उच्चमपथं नाम वास्तुर्ज्ञायते। तत्फलं वैरं, कलहः। अग्निकोण–दक्षिणयोन्तरं नीचं वायु–उत्तरयोरुच्चं स्यात् धरा रोगकृन्नाम तद्वास्तुर्ज्ञायते। तत्फलं रोगवृद्धिः।

निर्ऋत्यदक्षिणयोनीचं सोमशिवान्तरमुच्चं स्यात् भूमिः सा भूमिरगलं वास्तुः कथ्यते।

ईशान–पूर्वे उच्चं वरुणनैर्ऋत्ये नीचं स्मशानवास्तुः कथ्यते। तत्फलं कुलनाशनम्।

आग्नेयं नीचं नैर्ऋति–ईशान–वायुषु उच्चं स्यात् भूढ़िः तद्वास्तुः श्येनकवास्तुः कथ्यते। तत्फलं सम्पत्तिनाशः, मृत्युकारकः।

ईशान–अग्नि–पश्चिमे उच्चं नैर्ऋत्यकोणे नीचं स्यात् सा भूमिः स्वमुखवास्तुः मन्यते। तत्फलं दारिद्रयम्।

नैर्ऋत्ये–आग्नेये–ईशानकोणे उच्चं वह्निन्द्रयोस्तथा नीचं ब्रह्मध्नवास्तुः प्रख्यातः। सा भूमिः गृहनिर्माणकार्ये, निवेशनेऽयोग्या भूमिः वर्तते, तत्र कृषिकार्यं करणीयम्।

अग्नौ यदि भववेदुच्चं निर्ऋतिरुद्रयोः वायव्ये नीचं भवेत् तदा स्थावरवास्तुः कथ्यते। सा भूमिः सर्वकार्येषु शुभा भवति।

नैर्ऋत्यकोणे उच्चं स्यात् आग्नेय–वायव्ये–ईशानकोणे नीचं स्यात् तद्वास्तुः स्थण्डिल नाम शोभनम्। सा भूमिः स्थिरताप्रदायका शुभदा भवति।

रुद्रोच्चं–आग्नेय–नैर्ऋत्ये–वायव्ये नीचं भवेत् शाण्डुलं नाम तद्वास्तुः ज्ञायते। सा भूमिः गृहनिर्माणकार्ये, निवेशने सर्वदा त्याज्य भूमिः।

नैर्ऋत्याग्निशिवेषूच्चं तथा वायव्यकोणे नीचं स्यात् तदा सुस्थानवास्तुः कीर्तितः। ब्राह्मणानां निवेशने सुखदं भवति।

नीचमिनद्रे नैर्ऋत्यां पश्चिम–वायव्ये भवेदुच्चं सुतलवास्तुर्ज्ञायते। सा भूमिः क्षत्रियवर्णानां श्रेयस्करा भवति।

उत्तर–ईशान–वायव्यकोणेषु उच्चं दक्षिणं नीचं भवति तदा चरवास्तुः कथ्यते। सा भूमिः वैश्यानां कृते लाभदायिनी भवति।

नीचं वारुणमीशानकोणे, आग्नेयकोणे, पूर्वेषु उच्चं स्यात् खमुखं वास्तुः कथ्यते। सा भूमिः शुद्राणां निवेशने शुभा भवति।[१२१]

[121] बृहद्वास्तुमाला, पृ–१०–१४.४१–६४

तदुपरान्त–

**इन्द्रोन्नतं पुत्रनाशं वह्नयुन्नतमथार्थदम्।**

**अग्निनीचोऽर्थनाशः स्याद् याम्योन्नतमरोगकृत।।**

**निर्ऋत्युच्चे श्रियो लाभ पुत्रद वरुणोन्नतम्।**

**वायून्नत द्रव्यनाशं सौम्योन्नतमथागदम्।।**

**ईशानोच्चं महाक्लेशं वास्तु विद्यादितिक्रमात्।** [१२२]

अर्थात् इन्द्रोन्नता भूमिः पुत्रनाशकारका भूर्मन्यते। वह्नयुन्नता भूमिर्धनदायिका भूमिः कीर्तिता। अग्निकोणे नीचा भूमिः धननाशकारिका मन्यते। याम्योन्नता भूः स्वास्थ्यप्रदायका भूः प्रशस्यते। निर्ऋत्युच्चे श्रियोलाभोर्भवति। वरुणोन्नता पुत्रप्रदा भूमिर्ज्ञायते। वायून्नता द्रव्यनाशोर्भवति। सौम्योन्नता स्यात् तदा आरोग्यलाभोर्भवति। ईशानोच्चा महाक्लेशो भवति।

नगरस्य सन्निवेशमस्ति वा गृह–विन्यासमस्ति द्वयोर्प्रकारस्य सन्निवेशनार्थं पूर्व–ईशान–उत्तरदिक् प्लवा भूमिरेव शूभा भवति। इति वास्तुशास्त्रस्य मतम्।

मनुष्यालयचन्द्रिका ग्रन्थेऽपि एतावत् वर्णनं दृश्यते । एवश्च –

**इन्द्रेसादिनतावनी तदितराशद्युन्नताष्टौ क्रमाद्।**

**गोवह्नयन्तकभूतवारिफणभृन्मातङ्गधान्याह्वयाः।।** [१२३]

**गजपृष्ठाभूमिः –**

यथा हि वास्तुरत्नावल्याम् –

---

[122] बृहद्वास्तुमाला, पृ–१४.६९–७१

[123] मनुष्यालयचन्द्रिका, १.१९

**दक्षिणे पश्चिमे नैर्ऋतौ वायुकोणके।**

**एभिरुच्चा भवेद् भूमिः गजपृष्ठऽभिधीयते।।** [१२४]

या पृथिवी दक्षिणे, पश्चिमे, नैर्ऋत्ये, वायव्ये चोन्नता भवति तस्य संज्ञा गजपृष्ठेति। अत्र गजपृष्ठे वासफलमपि निरुपितमस्ति यत्–

**गजपृष्ठे भवेद्वासठ स लक्ष्मीधनपूरितः।**

**आयुर्वृद्धिकरो नित्यं जायते नात्र संशयः।।** [१२५]

गजपृष्ठे निवासकर्ता लक्ष्मीधनधान्यादिभिः सम्पन्नः सन् आयुवृद्धियुक्तश्च भवति।

**कूर्मपृष्ठाभूमिः** –

इत्थमेव या भूमिः मध्ये चोन्नता चतुर्दिक्षु च अवनता सा भूमिः कूर्मपृष्ठा कीर्तिता, तद्यथा वर्णिता वास्तुरत्नावल्याम्–

**मध्ये तूच्चं भवेद्यत्र नीचं चैव चतुर्दिशम्।**

**कूर्मपृष्ठा भवेद् भूमिः वासः शुभप्रदः।।** [१२६]

कूर्मपृष्ठे निवासफलमपि विस्तृतया वर्णितं यत्–

**कूर्मपृष्ठे भवेद्वासो नित्योत्साहसुखप्रदः।**

**धनधान्यं भवेत्तस्य निश्चितं विपुलं सदा।।**

**पूर्वोत्तरे प्लवं लक्ष्मीरीशाने च शुभं भवेत्।** [१२७]

---

[124] वास्तुरत्नावली, पृ–१७

[125] वास्तुरत्नावली, पृ–१७

[126] वास्तुरत्नावली, पृ–१७

[127] वास्तुरत्नावली, पृ–१७

यदि कूर्मपृष्ठ भूमेः वासो भवेत्तदा स वासः नित्योत्साहसुखप्रदश्च भवति, तथा च तस्य वासकर्तुः निश्चितं विपुलं बहुलं धनं धान्यं प्रददातीयं कूर्मपृष्ठा भूमिः। यदा सा भूमिः पूर्वोत्तरे सोम्यदिशि च ईशाने च यदि प्लवं नीचं भवेत्तदा तत्र वासे लक्ष्मीः शुभं भवति।

**दैत्यपृष्ठाभूमिः–**

**पूर्वाग्निशम्भुकोणेषु भूमौ यद्युन्नतिर्भवेत्।**

**पश्चिमे च यदा नीचं दैत्यपृष्ठऽभिधीयते।।** [१२८]

यत्र भूमौ पूर्वाग्निशम्भुकोणेषु प्रागनीशानकोणेषु उच्चं भवेत् तथा च पश्चिमदिशि नीचं भवेत् सा भूमिः दैत्यपृष्ठा मन्यते। तत्फलम्–

**दैत्यपृष्ठे भवेद्वासो लक्ष्मीर्नायाति मन्दिरे।**

**धनपुत्रपशूनाञ्च हानिरेव न संशयः।।** [१२९]

तत्र दैत्यपृष्ठभूमौ वासेन लक्ष्मीः, श्रीः नायाति, अपि च धनपुत्रपशूनां, पुत्रैश्वर्यानां हानिरेव, अत्र न संशयः।

**नागपृष्ठाभूमिः–**

**पूर्वपश्चिमयोर्दैर्ध्यं दक्षिणोत्तर उच्चता।**

**नागपृष्ठं विजानीयात् कर्तुरुच्चटनं भवेत्।।** [१३०]

इत्थमेव पूर्वपश्चिमयोः दिशि दैर्ध्यं दक्षिणोत्तरे च उच्चता यदि भवेत्तदा सा भूमिः नागपृष्ठाभूः ज्ञायते। तत्र वासफलम्–

**नागपृष्ठे यदा वासो मृत्युरेव न संशयः।**

---

[128] वास्तुरत्नावली, पृ–१८

[129] वास्तुरत्नावली, पृ–१८

[130] वास्तुरत्नावली, पृ–१८

**पत्नीहानिः पुत्रहानिः शत्रुवृद्धिः पदे पदे।।**[१३१]

यदा नागपृष्ठे वासः भवेत्तदा वासकर्तुः मरणमेव भवति। तथा पत्नीहानिः, सुतहानिः, पदे पदे च शत्रुवृद्धिः भवति इत्यत्र न संशयः। निम्नदर्शित सारिण्येव स्पष्टीक्रियते–

| क्रमः | भूमिः | स्थितिः | फलम् |
|---|---|---|---|
| १ | गजपृष्ठाभूमिः | दक्षिणे पश्चिमे नैर्ऋत्ये वायव्ये चोर्ध्वायाम् | धन–धान्यः–पुत्रादिक समृद्धिश्च |
| २ | कूर्मपृष्ठाभूमिः | मध्यभागोन्नता सर्वतश्चाधोगता | उत्साहः, धनवृद्धिश्च |
| ३ | दैत्यपृष्ठाभूमिः | पूर्वेशानेचाग्नेये उन्नता पश्चिमे प्लवा | धनस्य हानिः, नाशश्च |
| ४ | नागपृष्ठाभूमिः | पूर्ड़पश्चिमयोर्दीर्घा, उत्तरे दक्षिणोचोन्नता, मध्ये चाधोगता | पत्निपुत्रादीनां नाशः, शत्रूणां वृद्धिश्च |

नगरस्य सन्निवेशमस्ति वा गृह–विन्यासमस्ति द्वयोर्प्रकारयोः सन्निवेशनार्थं पूर्व–ईशाने–उत्तरदिक् प्लवा भूमिरेव शूभा भवति। इति वास्तुशास्त्रस्य मतम्। एतस्य शुभनिर्देशनस्य वैज्ञानिकमाधारमपि शिल्परत्नग्रन्थे स्पष्टं दृश्यते। यथा हि–

**प्राच्यां हि निषिद्धो हि गिरिः तच्छाययाप्युदये रवेः।**[१३२]

131 वास्तुरत्नावली, पृ–१८

132 शिल्परत्न, ३.३३

अस्माकं भारतीयवास्तुशास्त्रे गृहविन्यासनार्थं भूप्लवाधारेण शुभाशुभं वर्णनं विस्तृतरूपेण प्राप्यते। पूर्वे-उत्तरे-ईशाने अवनता भूमेः गृह-सन्निवेशने गृह-निवासिनाः प्रातःकालिक सूर्यस्य उपभोगं कर्तुं शक्नुवन्ति। एतानि किरणाणि शुभानि सन्ति। तेषुपरि शुभग्रहाणां प्रभुत्वं वर्तते। एतानि किरणाणि सूर्योदयादारभ्य मध्याह्नसमयपर्यन्तं प्राप्यन्ते। प्रातःकालिक सूर्य-रश्म्यां परावैगनी नीलातीत ( अल्ट्रा वायोलेट) किरणस्य अधिकता भवति, एतानि किरणानि मानवानां मनः-मस्तिष्कस्य प्रभावितं करोति। एतेभ्यः किरणेभ्यः आवस्यक ऊर्जा एवं प्रजीवकं (विटामिन डी तथा ए) प्रभूतमात्रायां प्राप्यते।

इदं प्रजीवकमस्माकं शरीरे स्वास्थ्यस्य कृते अतीवावश्यकम्। अस्य प्रजीवकस्य न्यूनतया अस्थिशोषो नामक रोगो भवतिः एवं शरीरस्य योग्यो विकासो न भवति। एतानि किरणाणि पूर्वदिशातः आगच्छन्ति। अतः गृहनिर्माणे पूर्वदिशायाः भागे मुक्तो भवेत्।

दिनस्य मध्याह्नकालादाराभ्य सूर्यास्तपर्यन्तमेतानि किरणाणि प्रभयत्वं भजन्ते। एतानि रेडियो धर्मिता (कोस्मिक) किरणाणि। एतानि किरण्याशुभफलदायकानि। तेषूपरि अशुभग्रहाणां प्रभुत्वं वर्तते। अस्माकं शरीरे एतानि स्वास्थ्यहानिकारकाणि सन्ति। एषां आगमनमार्गे दक्षिणपश्चिमदिशोर्मध्ये वर्तते। अतो गृहनिर्माणे प्रायः एतयोः दिशोर्निर्मार्णं कृत्वा एतयोः दिशोः प्रात्यवरोधः कर्तव्यः एवं तत्र दृढीकरणार्थं गुरुरूपेण निर्माणं कुर्यात् इति वास्तुशास्त्रे निर्देशो वर्तते। अतः प्रातःकालिक सूर्य-रश्मिभिः लाभो एवं मध्याह्न एवं सूर्यास्तकालिक- रश्मिभिः सुरक्षा हेतु पूर्वानतः भू-प्रदेशः प्रशस्तः मन्यन्ते।

## ८. मृत्तिकापरीक्षा-

### ► खातानुसारेण भूपरीक्षणम् –

अधुना वास्तुशास्त्रे भूपरीक्षणे खातपद्धतिः कथं वर्तते तद ग्रन्थानुसारेण वर्ण्यते। राजवल्लभवास्तुशास्त्रग्रन्थानुसारम् –

**खातं भूमिपरीक्षणे करमितं तत्पूरयेत्तन्मृदा**

**हीने हीनफलं समे समफलं लाभो रजोवर्धने।** [१३३]

भूमिपरीक्षणे समचतुरस्त्रं एकहस्तमानेन खातं कृत्वा तदनन्तरं तत् पूरयेत् यदा मृद्हीनं भवेत् तदा हीनफलम्। सम तदा समफलं, यदा वृद्धिर्भवति तदा उत्तमा भूमिर्वर्तते।

पुनः द्वितिया अपि रीतिरेका वर्तते बृहत्संहितायाम् –

**गृहमध्ये हस्तमितं खात्वा परिपूरितं पुनः स्वभ्रम्।**

**यद्यूनमनिष्टं तत् समे समं धन्यमधिकं यत्।।** [१३४]

यस्यां तस्मात् गर्तात् निस्सृता मृत्तिका पुनः तस्मिन्नेव गर्ते पूरिता भवति तथा च अवशिष्टा अपि भवति तदा सा भूमिर्ग्राह्या भवेत्। यदि च गर्तः मृत्तिकया समग्रतया पूर्येत तर्हि चेत् स्वल्पा भवति तर्हि सा भूमिः त्याज्या भवतीति।

समराङ्गणसूत्रधारेऽपि तथैवोच्यते यत् –

**शुभेऽह्न्युपोषितः स्नातः शुचिः शुक्लस्त्रगम्बरः।।**

**स्वस्ति विप्रान् वाचयित्वा वास्तुदेवान् समर्च्य च।**

**करप्रमाणं कुर्वति खातं तद्भूमिमध्यगम्।।**

**ततस्तन्मृदमाकृष्य तत् तथैवानुपूरयेत्।**

**खाताधिकमृदुक्ता भूः श्रेष्ठा मध्या च तत्समा।।**

**प्रहीणखातमृत् क्षोणी हीना शस्ता न सा नृणाम्।** [१३५]

---

133 राजवल्लभवास्तुशास्त्रम् (जुगनू), अ.१.१६

134 बृहत्संहिता, अ.५३.९०

यथा शुभदिने उपवासानुष्ठानं कृत्वा, पवित्रः सत्यः श्वेतमालास्तथा वास्तुदेवान्नर्चयित्वा उपरोक्त रीत्या परीक्षणं कर्तव्यम्। तथा खातमध्यदृश्यद्रव्यफलमाह –

**खन्यमाने यदा खाते तन्मृदोऽन्तर्विलोक्यते।।**

**मणिशंखप्रवालादि तदातिश्रेयसी क्षितिः।**

**सापि प्रशस्यते भूमिर्यस्यां स्युः कातपांसवः।।**

**तुषकेशोपलाङ्गारभस्मास्थिलववर्जिताः।** [१३६]

अर्थात् यत् गर्ते यदि मणिः, शंखः, प्रवालादि प्राप्तिस्तदा सा भूमिः निश्चयेन सम्पदाप्रदायका भवति। यदा भूमिखनने केवलं तुषकेशोपललाङ्गारः, भस्मणः अस्थीत्यादीनां प्राप्तिस्तदा सा भूमिः वर्जिता मन्यते।

यथोक्तं गृहवास्तुप्रदीपे –

**पिपीलिकाः षोडशपक्षनिद्राः भवति चेत्तत्र वसेन्न कर्ता।**

**तुषास्थिचीराणि तथैव भस्मान्यण्डानि सर्पाः मरणप्रदाः स्युः।।** [१३७]

भूमिखनने यदि पाषाणानां प्राप्तिस्तदा धनस्यायुषश्च वृद्धिर्ज्ञातव्या, यदि इष्टिकाः मिलन्ति तदा धनलाभो भवति, यदि अस्थिकेशभस्मादीनां प्राप्तिर्भवति तदा रोगादीनां भयं भवति। बृहद्वास्तुमालायामपि वर्णितमस्ति यत् भूपरीक्षणावसरे यदि खनने पिपिलिकादयः मिलन्ति, सर्पाऽजगरतुस्थिवस्थदग्धं काष्ठम् ईत्यादिकाः मिलन्ति तदा तत्र भवननिर्माणं न कर्तव्यम्।

---

[135] समराङ्गणसूत्रधारः, अ–८.६६–६९

[136] समराङ्गणसूत्रधारः, अ–८.६९–७१

[137] गृहवास्तुप्रदीपः, ५४.२३

एवमेव खननरीत्या खनने प्राप्तपदार्थानां जीवजन्तूनां अस्थिविकृतितत्त्वानां प्राप्त्या भूपरीक्षणावसरे शुभाशुभनिर्णयः क्रियते।

प्राकारान्तरेण राजवल्लभग्रन्थे वर्णितं यत् –

**तत्कृत्वा जलपूर्णमाशतपदं गत्वा परीक्ष्यं पुनः**

**पादोनेऽर्धविहीनकेऽथ निभृते मध्याधमेष्टाम्बुनी।।** [१३८]

यत् गर्तं जलेन प्रपूर्य शतपदानि दूरं गत्वा पुनरागमनानन्तरं यदि गर्ते पादोनपरिमाणजलं न्यूनं भवति तर्हि सा भूमिः मध्यमफलदायिका, यदि अर्धपरिमाणजलं न्यूनं भवति तर्हि सा भूमिः अर्धफलदायिका, यदि जलं यथावतिष्ठति तदा सा भूमिः वृद्धिकरी भवति।

समराङ्गणसूत्रधारग्रन्थेऽपि एतावत् –

**भृत्वाद्भिः खातमापूर्णे तस्मिन् पदशतं व्रजेत्।।**

**तावच्चेदागमेऽम्भः स्यात् तदा भूः सार्वकामिकी।**

**मद्यमात्रप्रहीणे स्यात् ततो हीनतरेऽधमा।।** [१३९]

तथा इहोक्तयोर्द्वितीयपरीक्षां शिवगुरुदेवः कथयति। यत् –

**तत्खातं वा जलापूर्णं कृत्वा पदशतं व्रजेत्।।**

**पुनरागच्छतः प्राग्वत् पूर्णं चेद् भूमिरुत्तमा।**

**यवन्यूना मध्यमा स्यात् त्याज्या न्यूना ततोऽधिकम्।।** [१४०]

संग्रहशिरोमण्यामपि योक्तम्

---

138 राजवल्लभः, अ–१.१६

139 समराङ्गणसूत्रधारः, अ.८.७१–७२

140 ईशानशिवगुरुदेव, उत्तरार्ध, २३.३९–४०

**खातं निशादावुत्खात्य हस्तं पूर्वं जलेन च।**

**प्रातर्दृष्टजले वृद्धिसमं पङ्के व्रणे क्षयः।।** [१४१]

सूर्यास्तसमये गृहकर्तुर्हस्तेनैकहस्तं दीर्घं विस्तृतं च एकहस्तमधोगतं गर्तं कारयित्वा जलं पूरयेत् यदि जलं शेषं तदा भूमिरुत्तमा, पङ्केन सहिता चेत् मध्यमा, शुष्का चेत् तर्हि हानिर्भवति।

समराङ्गणसूत्रधारग्रन्थे अन्यदप्याह –

**खाते सितादिमाल्यानि यस्यां निश्युषितानि च।**

**यद्वर्णानि न शुष्यन्ति सा तद्वर्णेष्टदा मही।।** [१४२]

यदि खाते विप्रादिवर्णानां क्रमशः श्वेत, रक्त, पीत कृष्णवर्णानां पुष्पमाल्यानि स्थापनीयानि। अनन्तरं परीक्षणं करणीयं यदा यद्वर्णानि माला न शुष्यन्ति सा भूमिः तद्वर्णानां कृते अभिष्टा भवति। अर्थात् श्वेतमाला न शुष्यति तदा सा भूमिः ब्राह्मणवर्णानां कृते शुभा भवति। यदा रक्तवर्णस्य माला न शुष्यति तदा सा धरा क्षत्रियवर्णानां कृते अभिष्टा भवति। यदा पीतवर्णस्य माला न शुष्यति तदा सा भूः वैश्यवर्णानां कृते शुभा भवति। यदा कृष्णवर्णस्य माला न शुष्यति तदा सा भूमिः शूद्रवर्णानां कृते शुभा भवति इति।

तथा चान्यपरीक्षणमपि समराङ्गणसूत्रधारे भोजेन प्रोक्तम् –

**खातस्योदक्प्रभृतिषु दिक्षु प्रज्वालयीत वा।**

**दीपान् यस्यां चिरं तिष्ठेत् तद्वर्णेष्टप्रदा हि सा।।** [१४३]

---

[141] संग्रहशिरोमणिः, श्लोक–३९

[142] समराङ्गणसूत्रधारः, अ.८.७३

[143] समराङ्गणसूत्रधारः, अ.८.७४

यत् गर्ते चर्तुदिक्षु प्रज्वलयिता: दीपा: स्थापनिया:। यस्यां दिशि चिरकालं प्रज्वलीत: तिष्ठेत् सा दिशा तत् वर्णानां कृते शुभा भवति। यथा उत्तरदिशायां चिरकालं प्रज्वलीत: दीप: भवेत् तदा सा भूमि: विप्रवर्णानां कृते इष्टदायी भवति, यदि पूर्वदिशायां प्रज्वलीत: दीप: भवेत् तदा सा भूमि: क्षत्रियवर्णानां कृते शुभा भवति, यदि दक्षिणदिशायां प्रज्वलीत: दीप: भवेत् तदा सा भूमि: वैश्यवर्णानां कृते शुभा भवति, यदि पश्चिमदिशायां प्रज्वलीत: दीप: भवेत् तदा सा भूमि: शूद्रवर्णानां कृते शुभा भवति।

इत्थमेव वास्तुशास्त्रस्य सर्वेषु ग्रन्थेषु खातप्रक्रिया भूमिचयनार्थम् इमा एव रीतय: प्रदर्शिता: सन्ति। खातेन प्राप्ता या मृत्तिका तस्य आढकपरिमित्या चतुष्षष्टिपलं वर्तते, तदितरप्रमाणेन खनिता या मृत्तिका सा अशुभा।

पुराणेष्वपि खातप्रक्रियाया: महान् विचारो दरीदृश्यते। यथोक्तं मस्त्यपुराणे –

**घृतमामशरावस्थं कृत्वा वर्त्तिचतुष्टयम्।**

**ज्वालयेद् भूपरीक्षार्थं तत्पूर्णं सर्वदिङ्मुखम्।।**

**दीप्तौ पूर्वादि गृह्णयाद् वर्णानामनुपूर्वश:।**

**वास्तुः सामुहिको नाम दीप्यते सर्वतस्तु य:।।** [१४४]

मस्त्यपुराणानुसारेण घनप्रमाणेन गर्तं गोमयेन विलिप्याऽपक्वमृत्तिकाया: पात्रं घृतेन प्रपूर्यं चतुर्भ्यो दिग्भ्यो चतस्त्रो वर्तिका, प्रज्वाल्य यावत्पर्यन्तं घृतमस्ति तावत्पर्यन्तं वर्तिका: प्रज्वलन्तु। इयं पद्धति: सामूहिका वास्तुपद्धति: कथ्यते। भूमिरियं चतुर्भ्यो वर्णेभ्यो शुभदा भवति। यदि वर्तिका प्राच्यामेव प्रज्वलति तर्हि सा भूमि: विप्राणां कृते सर्वोत्तमा भवति।

एवमेव गर्गाचार्यादीनाम् ऋषीणां मतानुसारम् –

---

144 मस्त्यपुराणम् , अ.२५३.१४–१५

**मनसश्चक्षुषोर्यत्र सन्तोषो जायते भुवि।**

**तस्यां कार्यं गृहं सर्वैरिति गर्गादिसम्मतम्।।** [१४५]

यथा यत्र मनसः, चक्षुषोः आनन्दश्च प्रसन्नता अनुभूयन्ते तत्र गृहनिर्माणं कृत्वा निवासः करणीयमिति गर्गाचार्यादीनां मतम्।

बृहत्संहितायामपि एतावत् –

**तत्तस्य भवति शुभदं यस्य च यस्मिन् मनो रमते।** [१४६]

## ९.**भूसंशोधनम्** -

खननक्रियाकाले भूमौ यानि वस्तूनि मिलन्ति, तानि द्विधा विभाज्यन्ते (१) शुभम्, (२) अशुभश्चेति। तत्र सर्वेषां भिन्नमापकपद्धत्या भूमेः संशोधनं क्रियते यतोहि गृहनिर्माणात् प्राक् भूशुद्धिर्निवार्या। यथोक्तं गृहवास्तुप्रदीपे –

**सम्मार्जनोपाञ्जनेन सेकेनोल्लेखनने च।**

**गवां च परिवासेन भूमिः शुध्यति पञ्चभिः।।** [१४७]

सा च शुद्धिः पञ्चभिप्रकारैः कर्तुं शक्यते – (१) मार्जनेन, (२) गोमूत्रेण गङ्गोदकेन च सिञ्चनं लेपनश्च, (३) सिञ्चनेन, (४) खननेन, (५) गवादीनां वासेन।

कुत्रचित्तु भूसंशोधनाय पुरुषप्रमाणं मृत्तिका बहिः निष्कास्य खननप्रदेशे नूतनामृत्तिका पूरणेन नानाविधभूमिदोषाणां निवृत्तिः जायते। तत्र भूसंशोधनविषये विस्तृततया वराहमिहिराचार्येण बृहत्संहितायां निगदितं यत् –

---

[145] बृहद्वास्तुमाला, श्लो.९३, पृ–१८

[146] बृहत्संहिता, अ.५३.९५

[147] गृहवास्तुप्रदीपः, पृ–१५

**कृष्टा प्ररुढबीजां गोऽध्युषितां ब्राह्मणैः प्रशस्तां च**

**गत्वा महीं गृहतिः काले सांवतसरोदिदष्टे।**

**भक्ष्यैर्नानाकारैर्दध्यक्षतसुराभिकुसुमधूपैश्च**

**दैवतपूजां कृत्वा स्थपतिनभ्यर्च्य विप्रांश्च।**

**विप्रः पादौ स्पृष्टवा शीर्षं वक्षश्च क्षत्रियो विशश्चोरु।**

**शूद्रः पादौ स्पृष्टवा कुर्याद्रेखां गृहारम्भे।।** [१४८]

प्रथमम् आदौ भूमिकर्षणं करणीयम्, तेन कर्षणानन्तरं तस्मिन् खननप्रदेशे बीजानां वपनं दूर्वादीनां रोपणं कर्तव्यम्। एषा प्रक्रिया मार्जनलेपनयोनन्तरं करणीया। तदनन्तरं सिञ्चनपूर्वकं शस्यादीनामुत्पादनं विधेयम्, पुनश्च तत्र कतिपयदिनेभ्यो गोवासश्च कर्तव्यः।

पुनः दैवज्ञोक्तदिशा शुभमुहूर्ते उत्तरायणे स्थिरनक्षत्रे शास्त्रोक्तविभिन्नप्रकारैः भक्ष्यपदार्था निदध्यतसुगन्धितकुसुमधूपैश्च क्षेत्रपति–स्थपति–ब्राह्मणान् पूजयित्वा यदि भूस्वामी ब्राह्मणश्चेत्तर्हि हस्तेन शरीरस्पर्शनं, क्षत्रियश्चेत् वक्षस्थलस्य, यदि वैश्यश्चेत् तर्हि उरुप्रदेशस्य, यदि शूद्रः स्यात्तर्हि हस्तेन पादस्पर्शनं कृत्वा गृहारम्भस्य रेखाङ्कनं कर्तव्यम्।

मयमतमेऽपि एतावत् –

**कृष्टवा गोमयमिश्राणि सर्वबीजानि वापयेत्।**

**दृष्टवा तानि विरुढानि फलपक्वगतानि च।।**

**सवृषाश्च सवत्साश्च ततो गास्तत्र वासयेत्।**

**यतो गोभिः परिक्रान्तमुपघ्राणैश्च पूजितम्।।**

**शंहष्टवृषनादैश्च निर्धौतकलुषीकृतम्।**

---

148 बृहत्संहिता, अ.५३.१६–१८

**वस्तसवक्त्रच्युतैः फेनैः संस्कृतं प्रस्नवैरपि।।**

**स्नातं गोमूत्रसेकैश्च गोपुरीषैः सलेपनम्।**

**च्युतरामन्थनोद्गारैर्गोष्पदैः कृतकौतुकम्।।**[१४९]

यत्र कर्षणानन्तरं गोमयमिश्रितानां बीजानां वपनं करणीयम्। तेषां बीजानां वर्द्धनफलं दृष्ट्वा सवत्साः धेनवः तत्र निवासनीयाः, एवं गवां पादं स्पृष्टवा तेहां श्वासोच्छवासात् तता शब्दाच्च, वत्समुखात् निस्सृतफेनैः गोमूत्रैः गोमयमिश्रितैः तेषां गवादीनां अर्धचर्वितभोज्यपदार्थः यत्र पतति तस्योपरि गोचलेन च गन्धैः गन्धिता भूमिः शुद्धा भवतीति प्रक्रिया इत्थं वर्णिता ।

वास्तुसारसंग्रहे अपि –

**सम्मार्जनोपाञ्जनेन सेकेनोल्लेखने च।**

**गवां च परिवासेन भूमिः शुद्धयति पञ्चभिः।।**[१५०]

सर्वेषामन्ते पवित्रगङ्गोदकादिभिः सिञ्चनं विधेयम्। एषा एव प्रक्रिया वर्णानां कृतेऽभिहिता। सम्मार्जनेन, गोमयलेपनेन, गोमूत्रगङ्गाजलादिभिः सिञ्चनेन उपरिस्थ अशुद्धमृत्तिकानां खननेन तथा गवां परिवासेन इत्थं पञ्चभिः प्रकारैः भूमिः शुद्धा जायते।

भूसंशोधनप्रसङ्गे तत्र वातावरणस्य भूमौ च निर्मलीकरणाय दुष्टादिवासान् अव्यक्तरुपान् शिथिलीकरणाय तत्र यो विधिः अस्माभिः अनुनीयते सः भूतापक्रमणम्। तत्र भूमौ पूर्वप्रक्रियया शुद्धिकरणानन्तरं भूपतिः भूमौ स्वस्तिः, जय ॐ इत्यादि मङ्गलवाचकैः शब्दैः सह देवबलिं याचयन् देवराक्षसाः अपकामन्तु, अन्यत्र देवतागणा सात्विकप्रवृत्तयः अत्र

---

[149] मयमतम् , अ.४.४–७

[150] वास्तुसारसंग्रहः, ५.३

निवसन्तु। तमोगुणबहुलाः दुष्टप्रवृत्तयः अपसरन्तु, तता च भूमिपरिग्रहमिति मन्त्रोच्चारणपूर्वकं भूसंशोधनं वातावरणशुद्धिश्च विधेया।